श्रीमद् भगवद् गीता - मूलमात्र

5c

श्रीमद् भगवद्गीता - मूलमात्र

श्रीमद् भगवद् गीता ।
(मूल)

श्रीकृष्णायनमः॥ॐअस्यश्रीभगवद्गीतामालामंत्रस्यश्रीभगवान्वे
दव्यासऋषिः॥अनुष्टुछंदः श्रीकृष्णपरमात्मादेवता॥अशोच्यान
न्वशोचस्त्वंप्रज्ञावादांश्चभाषसेइतिबीजं॥सर्वधर्मान्परित्यज्यमा
मेकंशरणंव्रजेतिशक्तिः॥अहंत्वांसर्वपापेभ्योमोक्षयिष्यामिमा
शुचइतिकीलकं॥नैनंछिंदंतिशस्त्राणिनैनंदहतिपावकइतिअंगु
ष्ठाभ्यांनमः॥नचैनंक्लेदयंत्यापोनशोषयतिमारुतइतितर्जनीभ्यां
नमः॥अछेद्योयमदाह्योयमक्लेद्योशोष्यएवचेइतिमध्यमाभ्यां
नमः॥नित्यःसर्वगतःस्थाणुरचलोयंसनातनइतिनामिकाभ्यां
नमः॥पश्यमेपार्थरूपाणिशतशोथसहस्रशइतिकनिष्ठिकाभ्यांन
मः॥नानाविधानिदिव्यानिनानावर्णाकृतिनिचेइतिकरतलक
रपृष्ठाभ्यांनमः॥इतिकरन्यास॥नैनंछिंदंतिशस्त्राणीइतिहृदया

यनमः॥ नचैनंक्लेदयंत्यापइतिशिरसेस्वाहा॥ अछेद्योयमदाह्योय
मितिशिखायैवषट्॥ नित्यःसर्वगतःस्थाणुरितिकवचायहुं॥ पश्यमे
पार्थरूपाणीतिनेत्रत्रयायवौषट्॥ नानाविधानिदिव्यानीत्यस्त्रायफ
ट्॥ श्रीकृष्णप्रीत्यर्थेजपेविनियोगः॥ इतिषडंगन्यासः॥ अथध्यानं॥ ॐ पार्था
यप्रतिबोधितांभगवतानारायणेनस्वयं॥ व्यासेनग्रथितांपुराणमु
निनामध्येमहाभारतं॥ अद्वैतामृतवर्षिणींभगवतीमष्टादशाध्या
यिनी॥ अंबत्वामनुसंदधामिभगवद्गीतेभवद्वेषिणीं॥१॥ नमोस्तुते
व्यासविशालबुद्धेफुल्लारविंदायतपत्रनेत्र॥ येनत्वयाभारततैलपूर्णः
प्रज्वालितोज्ञानमयःप्रदीपः॥२॥ प्रपन्नपारिजातायतोत्रवेत्रैकपा
णये॥ ज्ञानमुद्रायकृष्णायगीतामृतदुहेनमः॥३॥ सर्वोपनिषदोगावो
दुग्धागोपालनंदनः॥ पार्थोवत्सःसुधीर्भोक्तादुग्धंगीतामृतंमहत्॥

४॥ वसुदेवसुतंदेवंकंसचाणूरमर्द्दनं॥ देवकीपरमानंदंकृष्णंवंदेजग
द्गुरुं॥ ५॥ भीष्मद्रोणतटाजयद्रथजलागांधारनीलोत्पला॥ श
ल्यग्राहवतीकृपेणवाहिनीकर्णेनवेलाकुला॥ अश्वत्थामवि
कर्णघोरमकरादुर्योधनावर्त्तिनी॥ सोत्तीर्णाखलुपांडवारणनदीकै
वर्त्तकःकेशवः॥ ६॥ पाराशर्यवचःसरोजममलंगीतार्थगंधोत्क
टं॥ नानाख्यानककेशरंहरिकथासंबोधनाबोधितं॥ लोकेसज्ज
नषट्पदैरहरहःपेपियमानंमुदा॥ भूयाद्भारतपंकजंकलिमलप्र
ध्वंसिनःश्रेयसे॥ ७॥ मूकंकरोतिवाचालंपंगुंलंघयतेगिरिं॥ यत्कृपा
तमहंवंदेपरमानंदमाधवं॥ ८॥ यंब्रह्मावरुणेंद्ररुद्रमरुतस्तुन्वंतिदि
व्यैःस्तवैर्वेदैःसांगपदक्रमोपनिषदैर्गायंतियंसामगाः॥ ध्यानावस्थि
ततद्गतेनमनसापश्यंतियंयोगिनोयस्यांतंनविदुःसुरासुरगणादे

वायतस्मै नमः ॥ ॥ अथ ध्यानं ॥ धृतराष्ट्र उवाच ॥ धर्मक्षेत्रे कुरुक्षेत्रे
समवेता युयुत्सवः ॥ मामकाः पांडवाश्चैव किमकुर्वत संजय ॥ १ ॥
संजय उवाच ॥ दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा ॥ आचार्यमुप
संगम्य राजा वचनमब्रवीत ॥ २ ॥ पश्यैतां पांडुपुत्राणामाचार्य मह
तीं चमूं ॥ व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥ अत्र शूरा महे
ष्वासा भीमार्जुनसमा युधि ॥ युयुधानो विराटश्च द्रुपदश्च महा
रथः ॥ ४ ॥ धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान ॥ पुरुजि
त्कुंतीभोजश्च शैब्यश्च नरपुंगवः ॥ ५ ॥ युधामन्युश्च विक्रांत उत्तमौ
जाश्च वीर्यवान ॥ सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥ अ
स्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ॥ नायका मम सैन्यस्य
संज्ञार्थं तान्ब्रवीमि ते ॥ ७ ॥ भवान्भीष्मश्च कर्णश्च कृपश्च समि

तिंजयः ॥ अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥ अन्ये च
बहवः शूरा मदर्थे त्यक्तजीविताः ॥ नानाशस्त्रप्रहरणाः सर्वे युद्धवि
शारदाः ॥ ९ ॥ अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितं ॥ पर्याप्तं त्वि
दमेतेषां बलं भीमाभिरक्षितं ॥ १० ॥ अयनेषु च सर्वेषु यथाभागमव
स्थिताः ॥ भीष्ममेवाभिरक्षंतु भवंतः सर्व एव हि ॥ ११ ॥ तस्य संजनयं
न्हर्षं कुरुवृद्धः पितामहः ॥ सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवा
न ॥ १२ ॥ ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः ॥ सहसैवाभ्यह
न्यंत स शब्दस्तुमुलोभवत ॥ १३ ॥ ततः श्वेतैर्हयैर्युक्ते महति स्यंदने
स्थितौ ॥ माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः ॥ १४ ॥ पांचजन्यं
हृषीकेशो देवदत्तं धनंजयः ॥ पौंड्रं दध्मौ महाशंखं भीमकर्मा वृको
दरः ॥ १५ ॥ अनंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः ॥ नकुलः सहदेव

श्चसुघोषमणिपुष्पकौ॥१६॥काश्यश्चपरमेष्वासःशिखंडीचमहा
रथः॥धृष्टद्युम्नोविराटश्चसात्यकिश्चापराजितः॥१७॥द्रुपदोद्रौप
देयाश्चसर्वशःपृथिवीपते॥सौभद्रश्चमहाबाहुःशंखान्दध्मुःपृथ
क्पृथक्॥१८॥सघोषोधार्तराष्ट्राणांहृदयानिविदारयेत॥नभश्च
पृथिवींचैवतुमुलोव्यनुनादयन्॥१९॥अथव्यवस्थितान्दृष्ट्वाधा
र्तराष्ट्रान्कपिध्वजः॥प्रवृत्तेशस्त्रसंपातेधनुरुद्यम्यपांडवः॥२०॥
हृषीकेशंतदावाक्यमिदमाहमहीपते॥सेनयोरुभयोर्मध्येरथं
स्थापयमेच्युत॥२१॥यावदेतान्निरीक्षेहंयोद्धुकामानवस्थितान्
कैर्मयासहयोद्धव्यमस्मिन्रणसमुद्यमे॥२२॥योत्स्यमानानवेक्षेहं
यएतेत्रसमागताः॥धार्तराष्ट्रस्यदुर्बुद्धेर्युद्धेप्रियचिकीर्षवः॥२३॥सं

ज्ञय उवाच एवमुक्तो हृषीकेशो गुडाकेशेन भारत ॥ सेनयोरुभयोर्मध्ये
स्थापयित्वा रथोत्तमं ॥२४॥ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षि
तां ॥ उवाच पार्थ पश्यैतान्समवेतान कुरूनिति ॥२५॥ तत्रापश्यत्स्थितं
तान्पार्थः पितॄनथ पितामहान ॥ आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौ
त्रान्सखींस्तथा ॥२६॥ श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि तान्समी
क्ष्य स कौंतेयः ॥ सर्वान्बंधूनवस्थितान ॥२७॥ कृपया परयाविष्टो विषी
दन्निदमब्रवीत ॥ अर्जुन उवाच ॥ दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितं
॥२८॥ सीदंति मम गात्राणि मुखं च परिशुष्यति ॥ वेपथुश्च शरीरे मे रोम
हर्षश्च जायते ॥२९॥ गांडीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ॥ न
च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥३०॥ निमित्तानि च पश्या

निविपरीतानिकेशव॥नचश्रेयोनुपश्यामिहत्वास्वजनमाहवे॥३१
नकांक्षेविजयंकृष्णनचराज्यंसुखानिच॥किंनोराज्येनगोविंद
किंभोगैर्जीवितेनवा॥३२॥येषामर्थेकांक्षितंनोराज्यंभोगाःसुखा॰
निच।तइमेवस्थितायुद्धेप्राणांस्त्यक्त्वाधनानिच॥३३॥आचार्याः
पितरःपुत्रास्तथैवचपितामहाः॥मातुलाःश्वशुराःपौत्राःस्यालाःसं
बंधिनस्तथा॥३४॥एतान्नहंतुमिच्छामिघ्नतोपिमधुसूदन॥अपि
त्रैलोक्यराज्यस्यहेतोःकिंनुमहीकृते॥३५॥निहत्यधार्तराष्ट्रान्नःका
प्रीतिःस्याज्जनार्दन।पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः॥
३६।तस्मान्नार्हावयंहंतुंधार्तराष्ट्रान्स्वबांधवान्॥स्वजनंहिकथं
हत्वासुखिनःस्याममाधव॥३७॥यद्यप्येतेनपश्यंतिलोभोपह
तचेतसः॥कुलक्षयकृतंदोषंमित्रद्रोहेचपातकं॥३८॥कथंनज्ञे

यमस्माभिः पापादस्मान्निवर्त्तितुं ॥ कुलक्षयकृतं दोषं प्रपश्यद्भि
र्जनार्दन ॥ ३९ ॥ कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ॥ धर्मे
नष्टे कुलं कृत्स्नमधर्मोभिभवत्युत ॥ ४० ॥ अधर्माभिभवात्कृष्ण प्र
दुष्यन्ति कुलस्त्रियः ॥ स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४
१ ॥ संकरो नरकायैव कुलघ्नानां कुलस्य च ॥ पतंति पितरो ह्येषां लु
प्तपिंडोदकक्रियाः ॥ ४२ ॥ दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः
उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३ ॥ उत्सन्नकु
लधर्माणां मनुष्याणां जनार्दन ॥ नरके नियतं वासो भवतीत्यनु
शुश्रुम ॥ ४४ ॥ अहो बत महत्पापं कर्तुं व्यवसिता वयं ॥ यद्राज्यसु
खलोभेन हंतुं स्वजनमुद्यताः ॥ ४५ ॥ यदि मामप्रतिकारमशस्त्रं श
स्त्रपाणयः ॥ धार्त्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥ ४६ ॥ सं

संजय उवाच एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् ॥ विसृज्य सश-
रं चापं शोकसंविग्नमानसः ॥ ४७ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्म-
विद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादो नाम प्रथमोध्या-
य ॥ १ ॥ संजय उवाच ॥ तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं ॥ वि-
षीदंतमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥ श्रीभगवानुवाच ॥ कु-
तस्त्वा कश्मलमिदं विषमे समुपस्थितं ॥ अनार्यजुष्टमस्वर्ग्य-
मकीर्तिकरमर्जुन ॥ २ ॥ क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ॥
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥ ३ ॥ अर्जुन उवाच ॥ कथं भी-
ष्ममहं संख्ये द्रोणं च मधुसूदन ॥ इषुभिः प्रतियोत्स्यामि पूजार्हाव-
रिसूदन ॥ ४ ॥ गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह
लोके ॥ हत्वार्थकामांस्तु गुरूनिहैव भुंजीय भोगान् रुधिरप्रदि-

गी॰
१६

ग्धान॥५॥नचैतद्विद्मःकतरन्नोगरीयोयद्वाजयेमयदिवानोजये
युः॥यानेवहत्वानजिजीविषामस्तेवस्थिताःप्रमुखेधार्तराष्ट्राः॥६॥
कार्पण्यदोषोपहतस्वभावःपृछामित्वांधर्मसंमूढचेताः॥यछ्रेयः
स्यान्निश्चितंब्रूहितन्मेशिष्यस्तेहंशाधिमांत्वांप्रपन्नं॥७॥नहिप्र
पश्यामिममापनुद्याद्यछोकमुछोषणमिंद्रियाणां॥अवाप्यभू
मावसपत्नमृद्धंराज्यंसुराणामपिचाधिपत्यं॥८॥संजयउवाच॥ए
वमुक्त्वाहृषीकेशंगुडाकेशःपरंतप॥नयोत्स्यइतिगोविंदमुक्त्वा
तूष्णींबभूवह॥९॥तमुवाचहृषीकेशःप्रहसन्निवभारत॥सेनयो
रुभयोर्मध्येविषीदंतमिदंवचः॥१०॥श्रीभगवानुवाच॥अशोच्यानन्व
शोचस्त्वंप्रज्ञावादांश्चभाषसे॥गतासूनगतासूंश्चनानुशोचंतिपं
डिताः॥११॥नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः॥नचैवं

न भविष्यामः सर्वे वयमतः परं॥१२॥ देहिनोस्मिन्यथा देहे कौमारं यौव
नं जरा॥ तथा देहांतरप्राप्तिर्धीरस्तत्र न मुह्यति॥१३॥ मात्रास्पर्शा
स्तु कौंतेय शीतोष्णसुखदुःखदाः॥ आगमापायिनोनित्यास्तांस्ति
तिक्षस्व भारत॥१४॥ यं हि न व्यथयंत्येते पुरुषं पुरुषर्षभ॥ समदुः
खसुखं धीरं सोमृतत्वाय कल्पते॥१५॥ नासतो विद्यते भावो ना
भावो विद्यते सतः॥ उभयोरपि दृष्टोंतस्त्वनयोस्तत्वदर्शिभिः॥१६
अविनाशि तु तद्विद्धि येन सर्वमिदं ततं॥ विनाशमव्ययस्यास्य न
कश्चित्कर्तुमर्हसि॥१७॥ अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः
॥ अनाशिनोप्रमेयस्य तस्माद्युध्यस्व भारत॥१८॥ य एनं वेत्ति हं
तारं यश्चैनं मन्यते हतं॥ उभौ तौ विजानीतौ नायं हंति न हन्यते॥
१९॥ न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः

अजो नित्यः शाश्वतोयं पुराणो न हन्यते हन्यमाने शरीरे ॥२०॥ वे
दाविनाशिनं नित्यं य एनमजमव्ययं ॥ कथं स पुरुषः पार्थ कं घात
यति हंति कं ॥२१॥ वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति
नरोपराणि ॥ तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति न
वानि देही ॥२२॥ नैनं छिंदंति शस्त्राणि नैनं दहति पावकः ॥ न चैनं
क्लेदयंत्यापो न शोषयति मारुतः ॥२३॥ अछेद्योयमदाह्योयमक्ले
द्योशोष्य एव च ॥ नित्यः सर्वगतः स्थाणुरचलोयं सनातनः ॥२४॥ अ
व्यक्तोयमचिंत्योयमविकार्योयमुच्यते ॥ तस्मादेवं विदित्वैनं नानु
शोचितुमर्हसि ॥२५॥ अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतं ॥ तथा
पि त्वं महाबाहो नैनं शोचितुमर्हसि ॥२६॥ जातस्य हि ध्रुवो मृत्युर्ध्रु
वं जन्म मृतस्य च ॥ तस्मादपरिहार्येर्थे न त्वं शोचितुमर्हसि ॥२७॥

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ॥ अव्यक्तनिधनान्येवत
त्र का परिदेवना ॥ २८ ॥ आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वद
ति तथैव चान्यः ॥ आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चै
व कश्चित् ॥ २९ ॥ देहि नित्यमवध्योयं देहे सर्वस्य भारत तस्मात्स
र्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ ३० ॥ स्वधर्ममपि चावेक्ष्य न वि
कंपितुमर्हसि ॥ धर्म्याद्धि युद्धाछ्रेयोन्यत्क्षत्रियस्य न विद्यते ॥ ३१ ॥
यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतं ॥ सुखिनः क्षत्रियाः पार्थ ल
भंते युद्धमीदृशं ॥ ३२ ॥ अथ चेत्वमिमं धर्म्यं संग्रामं न करिष्यसि
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥ अकीर्तिं चापि भू
तानि कथयिष्यंति तेव्ययां ॥ संभावितस्य चाकीर्तिर्मरणादतिरि
च्यते ॥ ३४ ॥ भयाद्रणादुपरतं मंस्यंते त्वां महारथाः ॥ येषां च त्वं बहु

मतो भूत्वा यास्यसि लाघवं॥३५॥अवाच्यवादांश्च बहून्वदिष्यंति
तवाहिताः॥निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किं॥३६॥हतो वा
प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीं॥तस्मादुत्तिष्ठ कौंतेय युद्धाय
कृतनिश्चयः॥३७॥सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ
ततो युद्धाय युज्यस्व नैनं पापमवाप्स्यसि॥३८॥एषा तेभिहिता सांख्ये
बुद्धिर्योगे त्विमां शृणु॥बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसि॥
३९॥नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते॥स्वल्पमप्यस्य ध
र्मस्य त्रायते महतो भयात॥४०॥ व्यवसायात्मिका बुद्धिरेकेह कुरुनं
दन बहुशाखा ह्यनंताश्च बुद्धयोव्यवसायिनां॥४१॥यामिमां पुष्पि
तां वाचं प्रवदंत्यविपश्चितः वेदवादरताः पार्थ नान्यदस्तीति वा
दिनः॥४२॥कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां॥क्रियाविशे

षबहुलां भोगैश्वर्यगतिं प्रति ॥४३॥ भोगैश्वर्यप्रसक्तानां तयाप
हृतचेतसां ॥ व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥४४॥ त्रै
गुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ॥ निर्द्वन्द्वो नित्यसत्त्वस्थो निर्यो
गक्षेम आत्मवान् ॥४५॥ यावानर्थ उदपाने सर्वतः संप्लुतोदके ॥ तावा
न्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥४६॥ कर्मण्येवाधिकारस्ते मा फ
लेषु कदाचिन ॥ मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि ॥४७॥
योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय ॥ सिद्ध्यसिद्ध्योः समो भू
त्वा समत्वं योग उच्यते ॥४८॥ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय
॥ बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥४९॥ बुद्धियुक्तो जहा
तीह उभे सुकृतदुष्कृते तस्माद्योगाय युज्यस्व योगः कर्मसु कौश
लं ॥५०॥ कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ॥ जन्मबंधवि

निर्मुक्ताः पदं गछंत्यनामयं ॥ ५१ ॥ यदा ते मोहकलिलं बुद्धिर्व्यतित
रिष्यति ॥ तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२ ॥ श्रुतिवि
प्रतिपन्ना ते यदा स्थास्यति निश्चला ॥ समाधावचला बुद्धिस्तदा
योगमवाप्स्यसि ॥ ५३ ॥ अर्जुन उवाच ॥ स्थितप्रज्ञस्य का भाषा समा
धिस्थस्य केशव ॥ स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं ॥ ५४
॥ श्रीभगवानुवाच ॥ प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ॥
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥ दुःखेष्वनुद्विग्न
मनाः सुखेषु विगतस्पृहः ॥ वीतरागभयक्रोधः स्थितधीर्मुनिरु
च्यते ॥ ५६ ॥ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं ॥ नाभिनंद
ति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥ यदा संहरते चायं कूर्मोंगानी
व सर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥ विष

याविनिवर्त्तंते निराहारस्य देहिनः रसवर्जं रसोप्यस्य परं दृष्ट्वा नि
वर्त्तते ॥ ५९ ॥ यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः ॥ इंद्रियाणि प्र
माथीनि हरंति प्रसभं मनः ॥ ६० ॥ तानि सर्वाणि संयम्य युक्त आसी
त मत्परः ॥ वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥ ध्या
यतो विषयान्पुंसः संगस्तेषूपजायते ॥ संगात्संजायते कामः कामा
त्क्रोधोभिजायते ॥ ६२ ॥ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्र
मः ॥ स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणस्यति ॥ ६३ ॥ रागद्वेषवि
युक्तैस्तु विषयानिंद्रियैश्चरन् ॥ आत्मवश्यैर्विधेयात्मा प्रसादम
धिगच्छति ॥ ६४ ॥ प्रसादे सर्वदुःखानां हानिरस्योपजायते ॥ प्र
सन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥ नास्ति बुद्धिरयुक्तस्य
न चायुक्तस्य भावना ॥ न चाभावयतः शांतिरशांतस्य कुतः सुखं

६६ ॥ इंद्रियाणां हि चरतां यन्मनोनुविधीयते ॥ तदस्य हरति प्रज्ञां वा
युर्नावमिवांभसि ॥ ६७ ॥ तस्माद्यस्य महाबाहो निगृहीतानि सर्व
शः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥ या निशा स
र्वभूतानां तस्यां जागर्ति संयमी ॥ यस्यां जाग्रति भूतानि सा निशा प
श्यतो मुने ॥ ६९ ॥ आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशं
ति यद्वत ॥ तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामका
मी ॥ ७० ॥ विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ॥ निर्ममो
निरहंकारः स शांतिमधिगच्छति ॥ ७१ ॥ एषा ब्राह्मी स्थितिः पार्थ नै
नां प्राप्य विमुह्यति ॥ स्थित्वास्यामंतकालेपि ब्रह्मनिर्वाणमृछ
ति ॥ ७२ ॥ इति श्री भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्री
कृष्णार्जुनसंवादे सांख्ययोगो नाम द्वितीयोध्यायः ॥ २ ॥ अर्जुन उवा

॥ ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ॥ तत्किं कर्मणि घो
रे मां नियोजयसि केशव ॥ १ ॥ व्यामिश्रेणेव वाक्येन बुद्धिं मोहय
सीव मे ॥ तदेकं वद निश्चित्य येन श्रेयोहमाप्नुयां ॥ २ ॥ श्रीभग
वानुवाच ॥ लोकेस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ॥ ज्ञान
योगेन सांख्यानां कर्मयोगेन योगिनां ॥ ३ ॥ न कर्मणामनारंभा
न्नैष्कर्म्यं पुरुषोश्नुते ॥ न च संन्यसनादेव सिद्धिं समधिगछति ॥ ४
। न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ॥ कार्यते ह्यवशः क
र्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥ कर्मेंद्रियाणि संयम्य य आस्ते मनसा
स्मरन् ॥ इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥ ६ ॥ यस्त्विंद्रि
याणि मनसा नियम्यारभतेर्जुन ॥ कर्मेंद्रियैः कर्मयोगमसक्तः स विशि
ष्यते ॥ ७ ॥ नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ॥ शरीरयात्रापि

चतेनप्रसिद्धेदकर्मणः ॥ ८ ॥ यज्ञार्थात्कर्मणोन्यत्रलोकोयंकर्मबं
धनः ॥ तदर्थंकर्मकौंतेयमुक्तसंगः समाचर ॥ ९ ॥ सहयज्ञाः प्रजाः सृ
ष्ट्वापुरोवाचप्रजापतिः ॥ अनेनप्रसविष्यध्वमेषवोस्त्विष्टकामधुक ॥
१० ॥ देवान्भावयतानेनतेदेवाभावयंतुवः परस्परंभावयंतः श्रेयः
परमवाप्स्यथ ॥ ११ ॥ इष्टान्भोगान्हिवोदेवादास्यंतेयज्ञभाविताः ॥ तै
र्दत्तानप्रदायैभ्योयोभुंक्तेस्तेनएवसः ॥ १२ ॥ यज्ञशिष्टाशिनः संतोमु
च्यंतेसर्वकिल्बिषैः ॥ भुंजतेतेत्वघंपापायेपचंत्यात्मकारणात ॥
१३ ॥ अन्नाद्भवंतिभूतानिपर्जन्यादन्नसंभवः ॥ यज्ञाद्भवतिपर्जन्योयः
ज्ञःकर्मसमुद्भवः ॥ १४ ॥ कर्मब्रह्मोद्भवंविद्धिब्रह्माक्षरसमुद्भवं ॥ तस्मा
त्सर्वगतंब्रह्मनित्यंयज्ञेप्रतिष्ठितं ॥ १५ ॥ एवंप्रवर्तितंचक्रंनानुवर्तय
तीहयः ॥ अघायुरिंद्रियारामोमोघंपार्थसजीवति ॥ १६ ॥ यस्त्वात्

स्मरतिरेव स्यादात्मतृप्तश्च मानवः ॥ आत्मन्येव च संतुष्टस्तस्य कार्यं न
विद्यते ॥ १७ ॥ नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ॥ न चास्य सर्व
भूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥ तस्मादसक्तः सततं कार्यं कर्म स
माचर ॥ असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥ १९ ॥ कर्मणै
व हि संसिद्धिमास्थिता जनकादयः ॥ लोकसंग्रहमेवापि संपश्य
न्कर्तुमर्हसि ॥ २० ॥ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥ न मे पार्थास्ति कर्तव्यं
त्रिषु लोकेषु किंचन ॥ नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥
यदि ह्यहं न वर्तेयं जातु कर्मण्यतंद्रितः ॥ मम वर्त्मानुवर्तंते मनु
ष्याः पार्थ सर्वशः ॥ २३ ॥ उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं ॥ सं
करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ २४ ॥ सक्ताः कर्मण्यवि

द्वांसोयथाकुर्वंतिभारतकुर्याद्विद्वांस्तथाशक्तश्चिकीर्षुर्लोकसं
ग्रहं ॥ २५ ॥ नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनां ॥ जोषयेत्सर्वक
र्माणिविद्वान्युक्तःसमाचरन् ॥ २६ ॥ प्रकृतेःक्रियमाणानिगुणैः
कर्माणिसर्वशः ॥ अहंकारविमूढात्माकर्ताहमितिमन्यते ॥ २७ ॥
तत्त्ववित्तुमहाबाहोगुणकर्मविभागयोः ॥ गुणागुणेषुवर्तंतइति
मत्वानसज्जते ॥ २८ ॥ प्रकृतेर्गुणसंमूढाःसज्जंतेगुणकर्मसु ॥ तान
कृत्स्नविदोमंदान्कृत्स्नविन्नविचालयेत् ॥ २९ ॥ मयिसर्वाणि
कर्माणिसंन्यस्याध्यात्मचेतसा ॥ निराशीर्निर्ममोभूत्वायुध्यस्व
विगतःज्वरः ॥ ३० ॥ येमेमतमिदंनित्यमनुतिष्ठंतिमानवाः ॥ श्रद्धावं
तोनसूयंतोमुच्यंतेतेपिकर्मभिः ॥ ३१ ॥ येत्वेतदभ्यसूयंतोनानु
तिष्ठंतिमेमतं ॥ सर्वज्ञानविमूढांस्तान्विद्धिनष्टानचेतसः ॥ ३२

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ॥ प्रकृतिं यांति भूतानि नि-
ग्रहः किं करिष्यति ॥ ३३ ॥ इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ
तयोर्न वशमागछेतौ ह्यस्य परिपंथिनौ ॥ ३४ ॥ श्रेयान्स्वधर्मो विगुणः
परधर्मात्स्वनुष्ठितात ॥ स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५
अर्जुन उवाच ॥ अथ केन प्रयुक्तोयं पापं चरति पूरुषः ॥ अनिछन्नपि वा
र्ष्णेय बलादिव नियोजितः ॥ ३६ ॥ श्रीभगवानुवाच ॥ काम एष क्रोध एष
रजोगुणसमुद्भवः ॥ महाशनो महापाप्मा विद्धेनमिह वैरिणं ॥ ३७
धूमेनाव्रियते वन्हिर्यथादर्शो मलेन च ॥ यथोल्बेनावृतो गर्भस्तथा
तेनेदमावृतं ॥ ३८ ॥ आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ॥ का-
मरूपेण कौंतेय दुःपूरेणानलेन च ॥ ३९ ॥ इंद्रियाणि मनो बुद्धिर-
स्याधिष्ठानमुच्यते ॥ एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनं ॥ ४० ॥ त

स्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभः ॥ पाप्मानं प्रजहि ह्येनं
ज्ञानविज्ञाननाशनं ॥ ४१ ॥ इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः
॥ मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥ एवं बुद्धेः परं बुद्ध्वा
संस्तभ्यात्मानमात्मना जहि शत्रुं महाबाहो कामरूपं दुरासदं ॥
४३ ॥ इति श्री भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्री
कृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः ॥ ३ ॥ श्री भगवानुवाच ॥ इ
मं विवस्वते योगं प्रोक्तवानहमव्ययं ॥ विवस्वान्मनवे प्राह मनुरि
क्ष्वाकवेऽब्रवीत ॥ १ ॥ एवं परंपराप्राप्तमिमं राजर्षयो विदुः ॥ स कालेने
ह महता योगो नष्टः परंतप ॥ २ ॥ स एवायं मया तेऽद्य योगः प्रोक्तः पु
रातनः ॥ भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमं ॥ ३ ॥ अर्जुन उवा
च ॥ अपरं भवतो जन्म परं जन्म विवस्वतः ॥ कथमेतद्विजानीयां

त्वमादौप्रोक्तवानिति ॥ ४ ॥ श्रीभगवानुवाच ॥ बहूनिमेव्यतीतानि
जन्मानितवचार्जुन ॥ तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतप ॥ ५ ॥
अजोपिसन्नव्ययात्माभूतानामीश्वरोपिसन् ॥ प्रकृतिंस्वामधिष्ठा
यसंभवाम्यात्ममायया ॥ ६ ॥ यदायदाहिधर्मस्यग्लानिर्भवतिभा
रतः ॥ अभ्युत्थानमधर्मस्यतदात्मानंसृजाम्यहं ॥ ७ ॥ परित्राणाय
साधूनांविनाशायचदुष्कृतां ॥ धर्मसंस्थापनार्थायसंभवामियु॰
गेयुगे ॥ ८ ॥ जन्मकर्मचमेदिव्यमेवंयोवेत्तितत्वतः ॥ त्यक्त्वादेहंपु॰
नर्जन्मनैतिमामेतिसोर्जुन ॥ ९ ॥ वीतरागभयक्रोधामन्मयामामु
पाश्रिताः ॥ बहवोज्ञानतपसापूतामद्भावमागताः ॥ १० ॥ येयथामां
प्रपद्यंतेतांस्तथैवभजाम्यहं ॥ ममवर्त्मानुवर्तंतेमनुष्याःपा
र्थसर्वशः ॥ ११ ॥ कांक्षंतःकर्मणांसिद्धिंयजंतइहदेवताः ॥ क्षिप्रं

हिमानुषेलोकेसिद्धिर्भवतिकर्मजा॥१२॥चातुर्वर्ण्यंमयासृष्टंगुण
कर्मविभागशः॥तस्यकर्तारमपिमांविद्ध्यकर्तारमव्ययं॥१३॥नमां
कर्माणिलिंपंतिनमेकर्मफलेस्पृहा॥इतिमांयोभिजानातिक
र्मभिर्नसबध्यते॥१४॥एवंज्ञात्वाकृतंकर्मपूर्वैरपिमुमुक्षुभिः॥
कुरुकर्मैवतस्मात्त्वंपूर्वैःपूर्वतरंकृतं॥१५॥किंकर्मकिमक
र्मेतिकवयोप्यत्रमोहिताः॥तत्तेकर्मप्रवक्ष्यामियज्ज्ञात्वामोक्ष्यसे
ऽशुभात॥१६॥कर्मणोह्यपिबोधव्यंबोधव्यंचविकर्मणः॥अक
र्मणश्चबोधव्यंगहनाकर्मणोगतिः॥१७॥कर्मण्यकर्मयःपश्येद
कर्मणिचकर्मयः॥सबुद्धिमान्मनुष्येषुसयुक्तःकृत्स्नकर्मकृत॥
१८॥यस्यसर्वेसमारंभाःकामसंकल्पवर्जिताः॥ज्ञानाग्निदग्ध
कर्माणंतमाहुःपंडितंबुधाः॥१९॥त्यक्त्वाकर्मफलासंगंनित्य

तृप्तो निराश्रयः ॥ कर्मण्यभिप्रवृत्तोपि नैव किंचित्करोति सः ॥ २० ॥ निरा
शीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ॥ शारीरं केवलं कर्म कुर्वन्ना॰
प्नोति किल्बिषं ॥ २१ ॥ यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः ॥ समः
सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ २२ ॥ गतसंगस्य मुक्तस्य ज्ञा॰
नावस्थितचेतसः ॥ यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥ ब्रह्मा
र्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतं ॥ ब्रह्मैव तेन गंतव्यं ब्रह्मकर्म
समाधिना ॥ २४ ॥ दैवमेवापरे यज्ञं योगिनः पर्युपासते ॥ ब्रह्माग्नावप
रे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥ श्रोत्रादीनींद्रियाण्यन्ये संयमाग्निषु
जुह्वति ॥ २६ ॥ सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे ॥ आत्म॰
संयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥ द्रव्ययज्ञास्तपोयज्ञा योगा॰
यज्ञास्तथापरे ॥ स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥ अ

पानेजुह्वतिप्राणंप्राणेपानंतथापरे॥प्राणापानगतीरुद्ध्वाप्राणायामपरा
यणाः॥२९॥अपरेनियताहाराःप्राणान्प्राणेषुजुह्वति॥सर्वे
प्येतेयज्ञविदोयज्ञक्षपितकल्मषाः॥३०॥यज्ञशिष्टामृतभुजोयांति
ब्रह्मसनातनं॥नायंलोकोस्त्ययज्ञस्यकुतोन्यःकुरुसत्तम॥३१॥ए
वंबहुविधायज्ञावितताब्रह्मणोमुखे॥कर्मजान्विद्धितान्सर्वानेवं
ज्ञात्वाविमोक्ष्यसे॥३२॥श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञःपरंतप॥
सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्यते॥३३॥तद्विद्धिप्रणिपातेनप
रिप्रश्नेनसेवया॥उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्वदर्शिनः॥३४॥य
ज्ज्ञात्वानपुनर्मोहमेवंयास्यसिपांडव॥येनभूतान्यशेषेणद्रक्ष्यस्या
त्मन्यथोमयि॥३५॥अपिचेदसिपापेभ्यःसर्वेभ्यःपापकृत्तमः॥स
र्वंज्ञानप्लवेनैववृजिनंसंतरिष्यसि॥३६॥यथैधांसिसमिद्धोग्निर्भ

स्मसात्कुरुतेर्जुन॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥३७॥ न
हि ज्ञानेन सदृशं पवित्रमिह विद्यते॥ तत्स्वयं योगसंसिद्धः कालेनात्म
नि विंदति॥३८॥ श्रद्धावांल्लभते ज्ञानं तत्परः संयतेंद्रियः॥ ज्ञानं लब्ध्वा प
रां शांतिमचिरेणाधिगच्छति॥३९॥ अज्ञश्चाश्रद्दधानश्च संशयात्मा वि
नश्यति॥ नायं लोकोस्ति न परो न सुखं संशयात्मनः॥४०॥ योगसंन्यस्त
कर्माणं ज्ञानसंछिन्नसंशयं॥ आत्मवंतं न कर्माणि निबध्नंति धनंजय
॥४१॥ तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः॥ छित्वैनं संशयं योगमा
तिष्ठोत्तिष्ठ भारत॥४२॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशा
स्त्रे श्रीकृष्णार्जुनसंवादे कर्मसंन्यासयोगो नाम चतुर्थोध्यायः॥४॥ अर्जुन उवाच॥
संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि॥ यच्छ्रेय एतयोरेकं तन्मे ब्रूहि
सुनिश्चितं॥१॥ श्रीभगवानुवाच॥ संन्यासः कर्मयोगश्च निःश्रेयसकरा

वुभौ ॥ तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥ २ ॥ ज्ञेयः स नित्यसं-
न्यासी यो न द्वेष्टि न कांक्षति ॥ निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ॥
३ ॥ सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः ॥ एकमप्यास्थितः सम्यगु-
भयोर्विंदते फलं ॥ ४ ॥ यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥ एकं
सांख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥ संन्यासस्तु महाबाहो दुःखमा-
प्तुमयोगतः ॥ योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥ ६ ॥ योगयुक्तो वि-
शुद्धात्मा विजितात्मा जितेंद्रियः ॥ सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥
७ ॥ नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित ॥ पश्यन्शृण्वन्स्पृशन्
जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन ॥ ८ ॥ प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्न-
पि ॥ इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन ॥ ९ ॥ ब्रह्मण्याधाय कर्मा-
णि संगं त्यक्त्वा करोति यः ॥ लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥ १० ॥

कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि ॥ योगिनः कर्म कुर्वंति संगं त्यक्त्वात्म
शुद्धये ॥ ११ ॥ युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीं ॥ अयुक्तः काम
कारेण फले सक्तो निबध्यते ॥ १२ ॥ सर्वकर्माणि मनसा संन्यस्यास्ते सुखं व
शी ॥ नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३ ॥ न कर्तृत्वं न कर्माणि लोकस्य
सृजति प्रभुः ॥ न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥ नादत्ते कस्यचित्
पापं न चैव सुकृतं विभुः ॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ॥ १५ ॥ ज्ञाने
न तु तदज्ञानं येषां नाशितमात्मनः ॥ तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परं
॥ १६ ॥ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ॥ गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धू
तकल्मषाः ॥ १७ ॥ विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ॥ शुनि चैव श्व
पाके च पंडिताः समदर्शिनः ॥ १८ ॥ इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः
॥ निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ १९ ॥ न प्रहृष्येत्प्रियं प्रा

प्यनोद्विजेत्प्राप्य चाप्रियं ॥ स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः २० ॥
बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखं ॥ स ब्रह्मयोगयुक्तात्मा सुखम
क्षयमश्नुते ॥ २१ ॥ ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ॥ आद्यंतवंतः कौंते
य न तेषु रमते बुधः ॥ २२ ॥ शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ॥ काम
क्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ २३ ॥ योंतःसुखोंतरारामस्तथांतर्ज्योतिरेव
यः ॥ स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोधिगच्छति ॥ २४ ॥ लभंते ब्रह्मनिर्वाणमृ
षयः क्षीणकल्मषाः ॥ छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥ २५ ॥ काम
क्रोधवियुक्तानां यतीनां यतचेतसां ॥ अभितो ब्रह्मनिर्वाणं वर्तते विदिता
त्मनां ॥ २६ ॥ स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः ॥ प्राणापानौ
समौ कृत्वा नासाभ्यंतरचारिणौ ॥ २७ ॥ यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः
॥ विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥ २८ ॥ भोक्तारं यज्ञतपसां सर्व

लोकमहेश्वरं सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति ॥ २९ ॥ इति
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सं
न्यासयोगो नाम पंचमोऽध्यायः ॥ ५ ॥ श्रीभगवानुवाच ॥ अनाश्रितः कर्मफलं
कार्यं कर्म करोति यः ॥ स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥ १ ॥
यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव ॥ न ह्यसंन्यस्तसंकल्पो योगी
भवति कश्चन ॥ २ ॥ आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ॥ योगा
रूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥ यदा हि नेंद्रियार्थेषु न कर्मस्व
नुषज्जते ॥ सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥ उद्धरेदात्मना
त्मानं नात्मानमवसादयेत ॥ आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः
॥ ५ ॥ बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ॥ अनात्मनस्तु शत्रुत्वे व
र्तेतात्मैव शत्रुवत ॥ ६ ॥ जितात्मनः प्रशांतस्य परमात्मा समाहितः ॥ शी

तोष्णसुखदुःखेषुतथामानापमानयोः॥७॥ज्ञानविज्ञानतृप्तात्माकू
टस्थोविजितेंद्रियः॥युक्तइत्युच्यतेयोगीसमलोष्टाश्मकांचनः॥८॥
सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु॥साधुष्वपिचपापेषुसमबुद्धि
र्विशिष्यते॥९॥योगीयुंजीतसततमात्मानंरहसिस्थितः॥एकाकीयतचि
त्तात्मानिराशीरपरिग्रहः॥१०॥शुचौदेशेप्रतिष्ठाप्यस्थिरमासनमात्मनः
नात्युच्छ्रितंनातिनीचंचैलाजिनकुशोत्तरं॥११॥तत्रैकाग्रंमनःकृत्वायतचि
त्तेंद्रियक्रियः॥उपविश्यासनेयुंज्याद्योगमात्मविशुद्धये॥१२॥समंकाय
शिरोग्रीवंधारयन्नचलंस्थिरः॥संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चानवलो
कयन्॥१३॥प्रशांतात्माविगतभीर्ब्रह्मचारिव्रतेस्थितः॥मनःसंयम्यमच्चि
त्तोयुक्तआसीतमत्परः॥१४॥युंजन्नेवंसदात्मानंयोगीनियतमानसः॥शां
तिंनिर्वाणपरमांमत्संस्थामधिगच्छति॥१५॥नात्यश्नतस्तुयोगोस्तिनचै

कांतमनश्नतः ॥ नचातिस्वप्नशीलस्यजाग्रतोनैवचार्जुन ॥ १६ ॥ युक्ताहा
रविहारस्ययुक्तचेष्टस्यकर्मसु ॥ युक्तस्वप्नावबोधस्ययोगोभवतिदुःख
हा ॥ १७ ॥ यदाविनियतंचित्तमात्मन्येवावतिष्ठते ॥ निःस्पृहःसर्वकामे
भ्योयुक्तइत्युच्यतेतदा ॥ १८ ॥ यथादीपोनिवातस्थोनेंगतेसोपमास्मृता
॥ योगिनोयतचित्तस्ययुंजतोयोगमात्मनः ॥ १९ ॥ यत्रोपरमतेचित्तंनि
रुद्धंयोगसेवया ॥ यत्रचैवात्मनात्मानंपश्यन्नात्मनितुष्यति ॥ २० ॥ सु
खमात्यंतिकंयत्तद्बुद्धिग्राह्यमतींद्रियं ॥ वेत्तियत्रनचैवायंस्थितश्चल
तितत्त्वतः ॥ २१ ॥ यंलब्ध्वाचापरंलाभंमन्यतेनाधिकंततः ॥ यस्मिन्स्थि
तोनदुःखेनगुरुणापिविचाल्यते ॥ २२ ॥ तंविद्याद्दुःखसंयोगवियोगंयो
गसंज्ञितं ॥ सनिश्चयेनयोक्तव्योयोगोनिर्विण्णचेतसा ॥ २३ ॥ संकल्पप्रभ
वान्कामांस्त्यक्त्वासर्वानशेषतः ॥ मनसैवेंद्रियग्रामंविनियम्यसमंत

तः ॥२४॥ शनैःशनैरुपरमेद्बुद्ध्याधृतिगृहीतया ॥ आत्मसंस्थंमनःकृ-
त्वानकिंचिदपिचिंतयेत् ॥२५॥ यतोयतोनिश्चरतिमनश्चंचलमस्-
थिरं ॥ ततस्ततोनियम्यैतदात्मन्येववशंनयेत् ॥२६॥ प्रशांतमनसं
ह्येनंयोगिनंसुखमुत्तमं ॥ उपैतिशांतरजसंब्रह्मभूतमकल्मषं ॥२७॥
युंजन्नेवंसदात्मानंयोगीविगतकल्मषः ॥ सुखेनब्रह्मसंस्पर्शमत्यंतं
सुखमश्नुते ॥२८॥ सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि ॥ ईक्षतेयो-
गयुक्तात्मासर्वत्रसमदर्शनः ॥२९॥ योमांपश्यतिसर्वत्रसर्वंचमयिप-
श्यति ॥ तस्याहंनप्रणश्यामिसचमेनप्रणश्यति ॥३०॥ सर्वभूतस्थितंयो-
मांभजत्येकत्वमास्थितः ॥ सर्वथावर्तमानोपिसयोगीमयिवर्तते ॥३१॥
आत्मौपम्येनसर्वत्रसमंपश्यतियोर्जुनः ॥ सुखंवायदिवादुःखंसयोगी
परमोमतः ॥३२॥ अर्जुनउवाच ॥ योयंयोगस्त्वयाप्रोक्तःसाम्येनमधुसूद-

न ॥ एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिरां ॥ ३३ ॥ चंचलं हि मनः
कृष्ण प्रमाथि बलवद्दृढं ॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं ॥ ३४ ॥ श्री भ
गवानुवाच ॥ असंशयं महाबाहो मनो दुर्निग्रहं चलं ॥ अभ्यासेन तु कौंतेय
वैराग्येण च गृह्यते ॥ ३५ ॥ असंयतात्मना योगो दुष्प्राप इति मे मतिः ॥ वश्यात्म
ना तु यतता शक्योऽवाप्तुमुपायतः ॥ ३६ ॥ अर्जुन उवाच ॥ अयतिः श्रद्धयोपेतो यो
गाच्चलितमानसः ॥ अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७ ॥ कच्चिन्नो
भयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ॥ अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि
॥ ३८ ॥ एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ॥ त्वदन्यः संशयस्यास्य छेत्ता न ह्यु
पपद्यते ॥ ३९ ॥ श्री भगवानुवाच ॥ पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ॥ न हि
कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ४० ॥ प्राप्य पुण्यकृतां लोकानुषि
त्वा शाश्वतीः समाः ॥ शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४१ ॥ अथवा

योगिनामेवकुलेभवतिधीमतां॥ एतद्धिदुर्लभतरंलोकेजन्मयदीदृशं॥४
२॥ तत्रतंबुद्धिसंयोगंलभतेपौर्वदेहिकं॥ यततेचततोभूयःसंसिद्धौकुरुनंद
न॥४३॥ पूर्वाभ्यासेनतेनैवह्रियतेह्यवशोपिसन॥ जिज्ञासुरपियोगस्यशब्दब्र
ह्मातिवर्त्तते॥४४॥ प्रयत्नाद्यतमानस्तुयोगीसंशुद्धकिल्बिषः॥ अनेकजन्म
संसिद्धिस्ततोयातिपरांगतिं॥४५॥ तपस्विभ्योधिकोयोगीज्ञानिभ्योपिम
तोधिकः॥ कर्मिभ्यश्चाधिकोयोगीतस्माद्योगीभवार्जुन॥४६॥ योगिनामपि स
र्वेषांमद्गतेनांतरात्मना॥ श्रद्धावान्भजतेयोमांसमेयुक्ततमोमतः॥४७॥ इतिश्रीम
गवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेध्यानयोगोनाम
षष्ठोध्यायः॥६॥ श्रीभगवानुवाच॥ मय्यासक्तमनाःपार्थयोगंयुंजन्मदाश्रयः॥
असंशयंसमग्रंमांयथाज्ञास्यसितच्छृणु॥१॥ ज्ञानंतेहंसविज्ञानमिदंवक्ष्याम्य
शेषतः॥ यज्ज्ञात्वानेहभूयोन्यज्ज्ञातव्यमवशिष्यते॥२॥ मनुष्याणांसहस्रेषु

कश्चिद्यततिसिद्धये ॥ यततामपिसिद्धानांकश्चिन्मांवेत्तितत्त्वतः ॥ ३ ॥ भूमिरा-
पोनलोवायुःखंमनोबुद्धिरेवच ॥ अहंकारइतीयंमेभिन्नाप्रकृतिरष्टधा ॥ ४ ॥
अपरेयमितस्त्वन्यांप्रकृतिंविद्धिमेपरां ॥ जीवभूतांमहाबाहोययेदंधार्यते
जगत् ॥ ५ ॥ एतद्योनीनिभूतानिसर्वाणीत्युपधारय ॥ अहंकृत्स्नस्यजगतःप्र-
भवःप्रलयस्तथा ॥ ६ ॥ मत्तःपरतरंनान्यत्किंचिदस्तिधनंजय ॥ मयिसर्वमिदं
प्रोतंसूत्रेमणिगणाइव ॥ ७ ॥ रसोहमप्सुकौंतेयप्रभास्मिशशिसूर्ययोः ॥ प्र-
णवःसर्ववेदेषुशब्दःखेपौरुषंनृषु ॥ ८ ॥ पुण्योगंधःपृथिव्यांचतेजश्चा-
स्मिविभावसौ ॥ जीवनंसर्वभूतेषुतपश्चास्मितपस्विषु ॥ ९ ॥ बीजंमांसर्व-
भूतानांविद्धिपार्थसनातनं ॥ बुद्धिर्बुद्धिमतामस्मितेजस्तेजस्विनामहं
॥ १० ॥ बलंबलवतांचाहंकामरागविवर्जितं ॥ धर्माविरुद्धोभूतेषुकामो-
स्मिभरतर्षभ ॥ ११ ॥ येचैवसात्त्विकाभावाराजसास्तामसाश्चये ॥ मत्तएव

एवेतितान्विद्धिनत्वहंतेषुतेमयि ॥१२॥ त्रिभिर्गुणमयैर्भावैरेभिःसर्वमि
दंजगत् ॥ मोहितंनाभिजानातिमामेभ्यःपरमव्ययं ॥१३॥ दैवीह्येषागुणम
यीममामायादुरत्यया ॥ मामेवयेप्रपद्यंतेमायामेतांतरंतिते ॥१४॥ नमांदु
ष्कृतिनोमूढाःप्रपद्यंतेनराधमाः ॥ माययापहृतज्ञानाआसुरंभावमाश्रि
ताः ॥१५॥ चतुर्विधाभजंतेमांजनाःसुकृतिनोर्जुन ॥ आर्तोजिज्ञासुरर्था
र्थीज्ञानीचभरतर्षभः ॥१६॥ तेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यते ॥
प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियः ॥१७॥ उदाराःसर्वएवैतेज्ञानीत्वा
त्मैवमेमतं ॥ आस्थितःसहियुक्तात्मामामेवानुत्तमांगतिं ॥१८॥ बहूनांज
न्मनामंतेज्ञानवान्मांप्रपद्यते ॥ वासुदेवःसर्वमितिसमहात्मासुदुर्लभः
॥१९॥ कामैस्तैस्तैर्हृतज्ञानाःप्रपद्यंतेन्यदेवताः ॥ तंतंनियममास्थायप्रकृत्या
त्यानियताःस्वया ॥२०॥ योयोयांयांतनुंभक्तःश्रद्धयार्चितुमिच्छति ॥ त

स्यतस्याचलांश्रद्धांतामेवविदधाम्यहं॥२१॥सतयाश्रद्धयायुक्तस्तस्यारा
धनमीहते॥लभतेचततःकामान्मयैवविहितान्हितान्॥२२॥अंतव
त्तुफलंतेषांतद्भवत्यल्पमेधसां॥देवान्देवयजोयांतिमद्भक्तायांतिमाम
पि॥२३॥अव्यक्तंव्यक्तिमापन्नंमन्यंतेमामबुद्धयः॥परंभावमजानंतोम
माव्ययमनुत्तमं॥२४॥नाहंप्रकाशःसर्वस्ययोगमायासमावृतः॥मूढोयं
नाभिजानातिलोकोमामजमव्ययं॥२५॥वेदाहंसमतीतानिवर्तमाना
निचार्जुन॥भविष्याणिचभूतानिमांतुवेदनकश्चन॥२६॥इच्छाद्वेषसमु
त्थेनद्वंद्वमोहेनभारत॥सर्वभूतानिसंमोहंसर्गेयांतिपरंतप॥२७॥येषांत्वं
तगतंपापंजनानांपुण्यकर्मणां॥तेद्वंद्वमोहनिर्मुक्ताभजंतेमांदृढव्रताः
॥२८॥जरामरणमोक्षायमामाश्रित्ययतंतिये॥तेब्रह्मतद्विदुःकृत्स्नमध्या
त्मंकर्मचाखिलं॥२९॥साधिभूताधिदैवंमांसाधियज्ञंचयेविदुः॥प्रया

णाकालेपिचमांतेविदुर्युक्तचेतसः॥३०॥ इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्या
यांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेज्ञानविज्ञानयोगोनामसप्तमोध्यायः॥७॥ अर्जुनउवाच
किंतद्ब्रह्मकिमध्यात्मंकिंकर्मपुरुषोत्तमः अधिभूतंचकिंप्रोक्तमधिदैवंकि
मुच्यते॥१॥ अधियज्ञःकथंकोत्रदेहेस्मिन्मधुसूदन॥ प्रयाणकालेचकथंज्ञेयो
सिनियतात्मभिः॥२॥ श्रीभगवानुवाच॥ अक्षरंब्रह्मपरमंस्वभावोध्यात्ममुच्य
ते॥ भूतभावोद्भवकरोविसर्गःकर्मसंज्ञितः॥३॥ अधिभूतंक्षरोभावःपुरुष
श्चाधिदैवतं॥ अधियज्ञोहमेवात्रदेहेदेहभृतांवरः॥४॥ अंतकालेचमा
मेवस्मरन्मुक्त्वाकलेवरं॥ यःप्रयातिसमद्भावंयातिनास्त्यत्रसंशयः॥५॥ यंयं
वापिस्मरन्भावंत्यजत्यंतेकलेवरं॥ तंतमेवैतिकौंतेयसदातद्भावभावितः॥६
तस्मात्सर्वेषुकालेषुमामनुस्मरयुध्यच॥ मय्यर्पितमनोबुद्धिर्मामेवैष्यस्य
संशयः॥७॥ अभ्यासयोगयुक्तेनचेतसानान्यगामिना॥ परमंपुरुषंदिव्यंया

तिपार्थानुचिंतयन॥ ८ ॥ कविंपुराणमनुशासितारमणोरणीयंसमनुस्मरेद्यः
सर्वस्यधातारमचिंत्यरूपमादित्यवर्णंतमसःपरस्तात॥ ९ ॥ प्रयाणकालेम
नसाचलेनभक्त्यायुक्तोयोगबलेनचैव॥ भ्रुवोर्मध्येप्राणमावेश्यसम्य
कसतंपरंपुरुषमुपैतिदिव्यं॥ १० ॥ यदक्षरंवेदविदोवदंतिविशंतियद्यतयो
वीतरागाः॥ यदिछंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणप्रवक्ष्ये॥ ११ ॥ सर्वद्वा
राणिसंयम्यमनोहृदिनिरुध्यच॥ मूर्ध्न्याधायात्मनःप्राणमास्थितोयोगधार
णां॥ १२ ॥ ओमित्येकाक्षरंब्रह्मव्याहरन्मामनुस्मरन॥ यःप्रयातित्यजन्देहं
सयातिपरमांगतिं॥ १३ ॥ अनन्यचेताःसततंयोमांस्मरतिनित्यशः॥ तस्याहंसु
लभःपार्थनित्ययुक्तस्ययोगिनः॥ १४ ॥ मामुपेत्यपुनर्जन्मदुःखालयमशा
श्वतं॥ नाप्नुवंतिमहात्मानःसंसिद्धिंपरमांगताः॥ १५ ॥ आब्रह्मभुवनाल्लोकाः
पुनरावर्त्तिनोर्जुन॥ मामुपेत्यतुकौंतेयपुनर्जन्मनविद्यते॥ १६ ॥ सहस्रयुग

पर्यंतमहर्यद्ब्रह्मणो विदुः ॥ रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जनाः ॥१७॥ अव्य
क्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागमे ॥ रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञ
के ॥१८॥ भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ॥ रात्र्यागमेऽवशः पार्थ प्रभ
वंत्यहरागमे ॥१९॥ परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः ॥ यः
स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥२०॥ अव्यक्तोऽक्षर इत्युक्तस्तमाहुः प
रमां गतिं ॥ यं प्राप्य न निवर्तंते तद्धाम परमं मम ॥२१॥ पुरुषः स परः पार्थ
भक्त्या लभ्यस्त्वनन्यया ॥ यस्यांतःस्थानि भूतानि येन सर्वमिदं ततं ॥
२२ ॥ यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ॥ प्रयाता यांति तं का
लं वक्ष्यामि भरतर्षभ ॥२३॥ अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरा
यणं ॥ तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः ॥२४॥ धूमो रात्रिस्त
था कृष्णः षण्मासा दक्षिणायनं ॥ तत्र चांद्रमसं ज्योतिर्योगी प्राप्य

निवर्त्तते ॥२५॥ शुक्लकृष्णेगतीह्येतेजगतःशाश्वतेमते ॥ एकयायात्यना
वृत्तिमन्ययावर्त्ततेपुनः ॥२६॥ नैतेसृतीपार्थजानन्योगीमुह्यतिकश्चन
तस्मात्सर्वेषुकालेषुयोगयुक्तोभवार्जुन ॥२७॥ वेदेषुयज्ञेषुतपः
सुचैवदानेषुयत्पुण्यफलंप्रदिष्टं ॥ अत्येतितत्सर्वमिदंविदित्वायोगीप
रंस्थानमुपैतिचाद्यं ॥२८॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशा
स्त्रेश्रीकृष्णार्जुनसंवादेमहापुरुषयोगोनामअष्टमोध्यायः ॥८॥ श्रीभगवानुवाच ॥ इदं
तुतेगुह्यतमंप्रवक्ष्याम्यनसूयवे ॥ ज्ञानंविज्ञानसहितंयज्ज्ञात्वामोक्ष्यसे
शुभात् ॥ राजविद्याराजगुह्यंपवित्रमिदमुत्तमं ॥१॥ प्रत्यक्षावगमंधर्म्यंसु
सुखंकर्त्तुमव्ययं ॥२॥ अश्रद्दधानाःपुरुषाधर्मस्यास्यपरंतप ॥ अप्राप्यमांनि
वर्त्ततेमृत्युसंसारवर्त्मनि ॥३॥ मयाततमिदंसर्वंजगदव्यक्तमूर्त्तिना ॥ मत्स्था
निसर्वभूतानिनचाहंतेष्ववस्थितः ॥४॥ नचमत्स्थानिभूतानिप

श्यमेयोगमैश्वरं॥भूतभृन्नचभूतस्थोममात्माभूतभावनः॥५॥यथाका
शस्थितोनित्यंवायुःसर्वत्रगोमहान॥तथासर्वाणिभूतानिमत्स्थानीत्युप
धारय॥६॥सर्वभूतानिकौंतेयप्रकृतिंयांतिमामिकां॥कल्पक्षयेपुनस्ता
निकल्पादौविसृजाम्यहं॥७॥प्रकृतिंस्वामवष्टभ्यविसृजामिपुनःपुनः॥
भूतग्राममिमंकृत्स्नमवशंप्रकृतेर्वशात॥८॥नचमांतानिकर्माणिनिब
ध्नंतिधनंजय॥उदासीनवदासीनमसक्तंतेषुकर्मसु॥९॥मयाध्यक्षेणप्र
कृतिःसूयतेसचराचरं॥हेतुनानेनकौंतेयजगद्विपरिवर्तते॥१०॥अव
जानंतिमांमूढामानुषींतनुमाश्रितं॥परंभावमजानंतोममभूतमहेश्वरं
॥११॥मोघाशामोघकर्माणोमोघज्ञानाविचेतसः॥राक्षसीमासुरींचैव
प्रकृतिंमोहिनींश्रिताः॥१२॥महात्मानस्तुमांपार्थदैवींप्रकृतिमाश्रिताः॥
भजंत्यनन्यमनसोज्ञात्वाभूतादिमव्ययं॥१३॥सततंकीर्तयंतोमांयतंतस

ष्टढव्रताः ॥ नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते ॥१४॥ ज्ञानयज्ञे-
न चाप्यन्ये यजंतो मामुपासते ॥ एकत्वेन पृथक्त्वेन बहुधा विश्वतोमु-
खं ॥१५॥ अहं क्रतुरहं यज्ञः स्वधाहमहमौषधं ॥ मंत्रोहमहमेवाज्यमह-
मग्निरहं हुतं ॥१६॥ पिताहमस्य जगतो माता धाता पितामहः ॥ वेद्यं पवित्र-
मोंकार ऋक्साम यजुरेव च ॥१७॥ गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सु-
हृत ॥ प्रभवः प्रलयः स्थानं निधानं बीजमव्ययं ॥१८॥ तपाम्यहमहं वर्षं नि-
गृह्णाम्युत्सृजामि च ॥ अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥१९॥ त्रैविद्या
मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ॥ ते पुण्यमासाद्य सुरेंद्र-
लोकमश्नंति दिव्यान्दिवि देवभोगान् ॥२०॥ ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशंति ॥ एवं त्रयीधर्ममनुप्रपन्ना गतागतं काम-
कामा लभंते ॥२१॥ अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते ॥ तेषां नित्याभि-

युक्तानांयोगक्षेमंवहाम्यहं २२ येप्यन्यदेवताभक्तायजंतेश्रद्धयान्विताः
तेपिमामेवकौंतेययजंत्यविधिपूर्वकं २३ अहंहिसर्वयज्ञानांभोक्ताच
प्रभुरेवच नतुमामभिजानंतितत्वेनातश्च्यवंतिते २४ यांतिदेवव्रतादेवा
न्पितॄन्यांतिपितृव्रताः भूतानियांतिभूतेज्यायांतिमद्याजिनोपिमां २५
पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयछति तदहंभक्त्युपहृतमश्नामिप्रय
तात्मनः २६ यत्करोषियदश्नासियज्जुहोषिददासियत् यत्तपस्यसिकौं
तेयतत्कुरुष्वमदर्पणं २७ शुभाशुभफलैरेवंमोक्ष्यसेकर्मबंधनैः संन्या
सयोगयुक्तात्माविमुक्तोमामुपैष्यसि २८ समोहंसर्वभूतेषुनमेद्वेष्यो
स्तिनप्रियः येभजंतितुमांभक्त्यामयितेतेषुचाप्यहं २९ अपिचेत्सु
दुराचारोभजतेमामनन्यभाक साधुरेवसमंतव्यःसम्यग्व्यवसितोहि
सः ३० क्षिप्रंभवतिधर्मात्माशश्वछांतिंनिगछति कौंतेयप्रतिजा

नीहिनमेभक्तःप्रणश्यति ३१ मांहिपार्थव्यपाश्रित्ययेपिस्युःपापयोनयः

स्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरांगतिं ३२ किंपुनर्ब्राह्मणाःपुण्याभ

क्तागजर्षयस्तथा अनित्यमसुखंलोकमिमंप्राप्यभजस्वमां ३३ मन्मना

भवमद्भक्तोमद्याजीमांनमस्कुरु मामेवैष्यसियुक्त्वैवमात्मानंमत्परायणः

३४ ९ श्री ग ह्री सु नि त्सु ह्र ह्या यो शा श्री स्वा न वा

रा वि रा गु यो ना न मो यः ९ श्री ग नु च भूयएवमहा

बाहोशृणुमेपरमंवचः यत्तेहंप्रीयमाणायवक्ष्यामिहितकाम्यया १

नमेविदुःसुरगणाःप्रभवंनमहर्षयः अहमादिर्हिदेवानांमहर्षीणांचस

र्वशः २ योमामजमनादिंचवेत्तिलोकमहेश्वरं असंमूढःसमर्त्येषुसर्व

पापैःप्रमुच्यते ३ बुद्धिर्ज्ञानमसंमोहःक्षमासत्यंदमःशमः सुखंदुःखंभवो

भावोभयंचाभयमेवच ४ अहिंसासमतातुष्टिस्तपोदानंयशोयशः भ

वंतिभावाभूतानांमत्तएवपृथग्विधाः ५ महर्षयःसप्तपूर्वेचत्वारोमनव
स्तथा मद्भावामानसाजातायेषांलोकइमाःप्रजाः ६ एतांविभूतियोगं
चममयोवेत्तितत्वतः सोविकंपेनयोगेनयुज्यतेनात्रसंशयः ७ अ
हंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्तते इतिमत्वाभजंतेमांबुधाभावसम
न्विताः ८ मच्चित्तामद्गतप्राणाबोधयंतःपरस्परं कथयंतश्चमांनित्यं
तुष्यंतिचरमंतिचः ९ तेषांसततयुक्तानांभजतांप्रीतिपूर्वकं ददा
मिबुद्धियोगंतंयेनमामुपयांतिते १० तेषामेवानुकंपार्थमहमज्ञा
नजंतमः नाशयाम्यात्मभावस्थोज्ञानदीपेनभास्वता ११ अ न वा
परंब्रह्मपरंधामपवित्रंपरमंभवान पुरुषंशाश्वतंदिव्यमादिदेव
मजंविभुं १२ आहुस्त्वामृषयःसर्वेदेवर्षिर्नारदस्तथा असितोदेवलो
व्यासः स्वयंचैवब्रवीषिमे १३ सर्वमेतदृतंमन्येयन्मांवदसिकेशवः

न हि ते भगवान्व्यक्तिं विदुर्देवा न दानवाः १४ स्वयमेवात्मनात्मानं वे
त्थ त्वं पुरुषोत्तम भूतभावन भूतेश देवदेव जगत्पते १५ वक्तुमर्हस्य
शेषेण दिव्या ह्यात्मविभूतयः याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य
तिष्ठसि १६ कथं विद्यामहं योगिंस्त्वां सदा परिचिंतयन् केषु केषु च
भावेषु चिंत्योसि भगवन्मया १७ विस्तरेणात्मनो योगं विभूतिं च जनार्
दन भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेमृतं १८ श्री भ उ च हंत
ते कथयिष्यामि दिव्या ह्यात्मविभूतयः प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो
विस्तरस्य मे १९ अहमात्मा गुडाकेश सर्वभूताशयस्थितः अहमादिश्च
मध्यं च भूतानामंत एव चः २० आदित्यानामहं विष्णुर्ज्योतिषां रविरं
शुमान् मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी २१ वेदानां सामवेदो
स्मि देवानामस्मि वासवः इंद्रियाणां मनश्चास्मि भूतानामस्मि चेतना २२

रुद्राणांशंकरश्चास्मिवित्तेशोयक्षराक्षसां वसूनांपावकश्चास्मिमेरुः
शिखरिणामहं २३ पुरोधसांचमुख्यंमांविद्धिपार्थबृहस्पतिं सेनानीः
नामहंस्कंदःसरसामस्मिसागरः २४ महर्षीणांभृगुरहंगिरामस्म्येकम
क्षरं यज्ञानांजपयज्ञोस्मिस्थावराणांहिमालयः २५ अश्वत्थःसर्ववृ
क्षाणांदेवर्षीणांचनारदः गंधर्वाणांचित्ररथःसिद्धानांकपिलोमुनिः
२६ उच्चैःश्रवसमश्वानांविद्धिमाममृतोद्भवं ऐरावतंगजेंद्राणांनराणांच
नराधिपः २७ आयुधानामहंवज्रंधेनूनामस्मिकामधुक् प्रजनश्चास्मि
कंदर्पःसर्पाणामस्मिवासुकिः २८ अनंतश्चास्मिनागानांवरुणोयाद
सामहं पितॄणामर्यमाचास्मियमःसंयमतामहं २९ प्रह्लादश्चास्मि
दैत्यानांकालःकलयतामहं मृगाणांचमृगेंद्रोहंवैनतेयश्चपक्षिणां
३० पवनःपवतामस्मिरामःशस्त्रभृतामहं झषाणांमकरश्चास्मिस्रोत

स्रोतसामस्मिजान्हवी ३१ सर्गाणामादिरंतश्चमध्यंचैवाहमर्जुन अध्यात्म
विद्याविद्यानांवादःप्रवदतामहं ३२ अक्षराणामकारोस्मिद्वंद्वःसा
मासिकस्यच अहमेवाक्षयःकालोधाताहंविश्वतोमुखः ३३ मृत्युः
सर्वहरश्चाहमुद्भवश्चभविष्यतां कीर्तिःश्रीर्वाक्चनारीणांस्मृतिर्मेधा
धृतिःक्षमा ३४ बृहत्सामतथासाम्नांगायत्रीछंदसामहं मासानांमार्गशी
र्षोहमृतूनांकुसुमाकरः ३५ द्यूतंछलयतामस्मितेजस्तेजस्विनामहं
जयोस्मिव्यवसायोस्मिसत्वंसत्ववतामहं ३६ वृष्णीनांवासुदेवोस्मि
पांडवानांधनंजयः मुनीनामप्यहंव्यासःकवीनामुशनाकविः ३७ दंडो
दमयतामस्मिनीतिरस्मिजिगीषतां मौनंचैवास्मिगुह्यानांज्ञानंज्ञानवताम
हं ३८ यच्चापिसर्वभूतानांबीजंतदहमर्जुन नतदस्तिविनायत्स्यान्मया
भूतंचराचरं ३९ नांतोस्तिममदिव्यानांविभूतीनांपरंतप एषतूद्देशतः

प्रोक्तो विभूतेर्विस्तरो मया ४० यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा
तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवं ४१ अथवा बहुनैतेन किं ज्ञातेन तवा
र्जुन विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत ४२ इ श्री भ गी सु
नि तस स्र ह्म यो शा श्री कृ अ न वा वि ति गो म श ध्या
१० अ जु न वा मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं यत्त्वयोक्तं वच
स्तेन मोहोऽयं विगतो मम १ भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययं २ एवमेतद्यथात्थ त्वमात्मा
नं परमेश्वरं द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तमं ३ मन्यसे यदि तच्छक्यं
मया द्रष्टुमिति प्रभो योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययं ४ श्री भ उ
च पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः नानाविधानि दिव्यानि
नानावर्णाकृतीनि च ५ पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा

बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ६ इहैकस्थं जगत्कृत्स्नं पश्याद्य स
चराचरं मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ७ न तु मां शक्यसे द्रष्टु
मनेनैव स्वचक्षुषा दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरं ८ स उ
वा एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः दर्शयामास पार्थाय परमं रू
पमैश्वरं ९ अनेकवक्त्रनयनमनेकाद्भुतदर्शनं अनेकदिव्याभरणं
दिव्यानेकोद्यतायुधं १० दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनं सर्वा
श्चर्यमयं देवमनंतं विश्वतोमुखं ११ दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थि
ता यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः १२ तत्रैकस्थं जगत्कृत्स्नं
प्रविभक्तमनेकधा अपश्यद्देवदेवस्य शरीरे पांडवस्तदा १३ ततः स वि
स्मयाविष्टो हृष्टरोमा धनंजयः प्रणम्य शिरसा देवं कृतांजलिरभाषत १४
अ न वा पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान ब्र

ह्माणमीशंकमलासनस्थमृषींश्चसर्वानुरगांश्चदिव्यान १५ अनेक
बाहूदरवक्त्रनेत्रंपश्यामित्वांसर्वतोनंतरूपं नांतंनमध्यंनपुनस्तवादिं
पश्यामिविश्वेश्वरविश्वरूप १६ किरीटिनंगदिनंचक्रिणंचतेजोरा
शिंसर्वतोदीप्तिमंतं पश्यामित्वांदुर्निरीक्ष्यंसमंताद्दीप्तानलार्कद्युतिम
प्रमेयं १७ त्वमक्षरंपरमंवेदितव्यंत्वमस्यविश्वस्यपरंनिधानं त्वमव्य
यःशाश्वतधर्मगोप्तासनातनस्त्वंपुरुषोमतोमे १८ अनादिमध्यांतम
नंतवीर्यमनंतबाहुंशशिसूर्यनेत्रं पश्यामित्वांदीप्तहुताशवक्त्रंस्वतेज
साविश्वमिदंतपंतं १९ द्यावापृथिव्योरिदमंतरंहिव्याप्तंत्वयैकेनदि
शश्चसर्वाः दृष्ट्वाद्भुतंरूपमुग्रंतवेदंलोकत्रयंप्रव्यथितंमहात्मन २०
अमीहित्वांसुरसंघाविशंतिकेचिद्भीताःप्रांजलयोगृणंति स्वस्तीत्यु
क्त्वामहर्षीसिद्धसंघाःस्तुवंतित्वांस्तुतिभिःपुष्कलाभिः २१ रुद्रादित्या

वसवोयेचसाध्याविश्वेश्विनौमरुतश्चोष्मपाश्च गंधर्वयक्षा
सुरसिद्धसंघाः वीक्षंतेत्वांविस्मिताश्चैवसर्वे २२ रूपंमहत्तेबहु
वक्त्रनेत्रंमहाबाहोबहुबाहूरुपादं बहूदरंबहुदंष्ट्राकरालंदृष्ट्वालो
काःप्रव्यथितास्तथाहं २३ नभस्पृशंदीप्तमनेकवर्णंव्यात्ताननंदी
प्तविशालनेत्रं दृष्ट्वाहित्वांप्रव्यथितांतरात्माधृतिंनविंदामिश
मंचविष्णो २४ दंष्ट्राकरालानिचतेमुखानिदृष्ट्वैवकालानल
सन्निभानि दिशोनजानेनलभेचशर्मप्रसीददेवेशजगन्निवा
स २५ अमीचित्वांधृतराष्ट्रस्यपुत्राःसर्वेसहैवावनिपालसंघैः
भीष्मोद्रोणःसूतपुत्रस्तथासौसहास्मदीयैरपियोधमुख्यैः २६ व
क्त्राणितेत्वरमाणाविशंतिदंष्ट्राकरालानिभयानकानि केचिद्वि
लग्नादशनांतरेषुसंदृश्यंतेचूर्णितैरुत्तमांगैः २७ यथानदीनांब

हवोंबुवेगाः समुद्रमेवाभिमुखाद्रवंति तथातवामीनरलोकवीरावि
शंतिवक्त्राण्यभिविज्वलंति २८ यथाप्रदीप्तंज्वलनंपतंगाविशंति
नाशायसमृद्धवेगास्तथैवनाशायविशंतिलोकास्तवापिवक्त्राणिस
मृद्धवेगाः २९ लेलिह्यसेग्रसमानः समंताल्लोकान्समग्रान्वदनै
र्ज्वलद्भिः तेजोभिरापूर्यजगत्समग्रंभासस्तवोग्राःप्रतपंतिविष्णो
३० आख्याहिमेकोभवानुग्ररूपोनमोस्तुतेदेववरप्रसीद विज्ञा
तुमिच्छामिभवंतमाद्यंनहिप्रजानामितवप्रवृत्तिं ३१ श्री भ नु च
कालोस्मिलोकक्षयकृत्प्रवृद्धोलोकान्समाहर्तुमिहप्रवृत्तः ऋतेपि
त्वांनभविष्यंतिसर्वेयेवस्थिताःप्रत्यनीकेषुयोधाः ३२ तस्मात्त्व
मुत्तिष्ठयशोलभस्वजित्वाशत्रून्भुंक्ष्वराज्यंसमृद्धं मयैवैतेनिहताः
पूर्वमेवनिमित्तमात्रंभवसव्यसाचिन ३३ द्रोणंचभीष्मंचजयद्र

थंचकर्णंतथान्यानपियोधवीरान मयाहतांस्त्वंजहिमाव्यथिष्ठायुध्य
स्वजेतासिरणेसपत्नान ३४ सं उ वा एतछ्रुत्वावचनंकेशवस्य
कृतांजलिर्वेपमानःकिरीटी नमस्कृत्वाभूयएवाहकृष्णंसगद्गदंभी
तभीतःप्रणम्य ३५ अ उ वा स्थानेहृषीकेशतवप्रकीर्त्याजगत्प्रहृ
ष्यत्यनुरज्यतेच रक्षांसिभीतानिदिशोद्रवंतिसर्वेनमस्यंतिचसिद्धसं
घा ३६ कस्माच्चतेननमेरन्महात्मन्गरीयसेब्रह्मणोप्यादिकर्त्रे अनंत
देवेसजगन्निवासस्त्वमक्षरंसदसत्तत्परंयत ३७ त्वमादिदेवपुरुषपुराण
स्त्वमस्यविश्वस्यपरंनिधानं वेत्तासिवेद्यंचपरंचधामत्वयाततंविश्वम
नंतरूपं ३८ वायुर्यमोग्निर्वरुणःशशांकःप्रजापतिस्त्वंप्रपितामहश्च
नमोनमस्तेस्तुसहस्रकृत्वःपुनश्चभूयोपिनमोनमस्ते ३९ नमपु
रस्तादथपृष्ठतस्तेनमोस्तुतेसर्वतएवसर्व अनंतवीर्यामितविक्रमः

त्वं सर्वं समाप्नोषि ततोसि सर्वः ४० सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे
हे यादव हे सखेति अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वा
पि ४१ यच्चावहासार्थमसत्कृतोसि विहारशय्यासनभोजनेषु एको
थवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयं ४२ पितासि लोक
स्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् न त्वत्समोस्त्यभ्यधिकः
कुतोन्यो लोकत्रयेप्यप्रतिमप्रभाव ४३ तस्मात्प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यं पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्ह
सि देव सोढुं ४४ अदृष्टपूर्वं हृषितोस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो
मे तदेव मे दर्शय देवरूपं प्रसीद देवेश जगन्निवास ४५ किरीटिनं ग
दिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव तेनैव रूपेण चतुर्भुजेन सहस्र
बाहो भव विश्वमूर्ते ४६ श्री ग नु च मया प्रसन्नेन तवार्जुनेदं

पं परं दर्शितमात्मयोगात् तेजोमयं विश्वमनंतमाद्यं यन्मे त्वदन्येन न दृष्ट
पूर्वं ४७ न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः एवंरूपः
शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ४८ मा ते व्यथा मा च विमूढ
भावो दृष्ट्वा रूपं घोरमीदृङ्ममेदं व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रू
पमिदं प्रपश्य ४९ सं उ वा इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्श
यामास भूयः आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महा
त्मा ५० अ उ वा दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन इदानीमस्मि
संवृत्तः सचेताः प्रकृतिं गतः ५१ श्री ग नु च सुदुर्दर्शमिदं रूपं दृष्टवा
नसि यन्मम देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः ५२ नाहं वेदैर्न
तपसा न दानेन न चेज्यया शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ५३
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ज्ञातुं द्रष्टुं च तत्वेन प्रवेष्टुं च

परंतप ५४ मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः निर्वैरः सर्वभूतेषु
यः स मामेति पांडव ५५ ६ श्री ग गी सु नि त्सु ब्र द्या यो
शा श्री कृ ष्णा न वा वि रू द न यो मै द ध्या ११ र्जुन वा
एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ये चाप्यक्षरमव्यक्तं तेषां के
योगवित्तमाः १ श्री ग नु च मय्यावेश्य मनो ये मां नित्ययुक्ता उपा
सते श्रद्धया परयोपेतास्ते मे युक्ततमा मताः २ ये त्वक्षरमनिर्देश्यमव्य
क्तं पर्युपासते सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवं ३ संनियम्येंद्रि
यग्रामं सर्वत्र समबुद्धयः ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ४ क्लेशो
धिकतरस्तेषामव्यक्तासक्तचेतसां अव्यक्ता हि गतिर्दुःखं देहवद्भिरवा
प्यते ५ ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येनैव योगेन
मां ध्यायंत उपासते ६ तेषामहं समुद्धर्ता मृत्युसंसारसागरात् भवामि न

न चिरात्पार्थ मय्यावेशितचेतसां ७ मय्येव मन आधत्स्व मयि बुद्धिं
निवेशय निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ८ अथ चित्तं समा
धातुं न शक्नोषि मयि स्थिरं अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय
९ अभ्यासेप्यसमर्थोसि मत्कर्मपरमो भव मदर्थमपि कर्माणि कु
र्वन्सिद्धिमवाप्स्यसि १० अथैतदप्यशक्तोसि कर्तुं मद्योगमाश्रितः
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान ११ श्रेयो हि ज्ञानमभ्यासा
ज्ज्ञानाद्ध्यानं विशिष्यते ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरं १२
अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च निर्ममो निरहंकारः समदुःखसुख
क्षमी १३ संतुष्टः सततं योगी यतात्मा दृढनिश्चयः मय्यर्पितमनोबुद्धि
र्यो मद्भक्तः स मे प्रियः १४ यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः १५ अनपेक्षः शुचिर्दक्ष उदा

सीनोगतव्यथः सर्वारंभपरित्यागीयोमद्भक्तःसमेप्रियः १६ योनहृष्यं
तिनद्वेष्टिनशोचतिनकांक्षति शुभाशुभपरित्यागीभक्तिमान्यःसमे
प्रियः १७ समःशत्रौचमित्रेचतथामानापमानयोः शीतोष्णसुखदुःखे
षुसमःसंगविवर्जितः १८ तुल्यनिंदास्तुतिर्मौनीसंतुष्टोयेनकेनचित
अनिकेतःस्थिरमतिर्भक्तिमान्मेप्रियोनरः १९ येतुधर्मामृतमिदंय
थोक्तंपर्युपासते श्रद्दधानामत्परमाभक्तास्तेतीवमेप्रियाः २० इ
श्री ग गी सू नि सु ब्र द्या यो शा श्री कृ न वा
भ यो ना द्वा शो यः १२ अ न वा प्रकृतिंपुरुषंचैवक्षेत्रं
क्षेत्रज्ञमेवच एतद्वेदितुमिच्छामिज्ञानंज्ञेयंचकेशव १ श्री ग उ
च इदंशरीरंकौंतेयक्षेत्रमित्यभिधीयते एतद्योवेत्तितंप्राहुःक्षेत्र
ज्ञमितितद्विदः २ क्षेत्रज्ञंचापिमांविद्धिसर्वक्षेत्रेषुभारत क्षेत्रक्षेत्र

ज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ३ तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च य
त् स च यो यत्प्रभावश्च तत्समासेन मे शृणु ४ ऋषिभिर्बहुधा गीतं
छंदोभिर्विविधैः पृथक् ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ५
महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च इंद्रियाणि दशैकं च पंच चेंद्रि
यगोचराः ६ इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः एतत्क्षेत्रं स
मासेन सविकारमुदाहृतं ७ अमानित्वमदंभित्वमहिंसा क्षांतिरार्ज
वं आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ८ इंद्रियार्थेषु वैरा
ग्यमनहंकार एव च जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं ९ अ
सक्तिरनभिष्वंगः पुत्रदारगृहादिषु नित्यं च समचित्तत्वमिष्टानिष्टो
पपत्तिषु १० मयि चानन्ययोगेन भक्तिरव्यभिचारिणी विविक्तदेश
सेवित्वमरतिर्जनसंसदि ११ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थ

देर्शनं एतज्ज्ञानमितिप्रोक्तमज्ञानंयदतोन्यथा १२ ज्ञेयंयत्तत्प्रव॰
क्ष्यामियज्ज्ञात्वामृतमश्नुते अनादिमत्परंब्रह्मनसत्तन्नासदुच्यते
१३ सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं सर्वतःश्रुतिमल्लोके सर्वमा
वृत्यतिष्ठति १४ सर्वेंद्रियगुणाभासंसर्वेंद्रियविवर्जितं असक्तंसर्व
भृच्चैवनिर्गुणंगुणभोक्तृच १५ वहिरंतश्चभूतानामचरंचरमेवच
सूक्ष्मत्वात्तदविज्ञेयंदूरस्थंचांतिकेचतत १६ अविभक्तंचभूतेषुवि
भक्तमिवचस्थितं भूतभर्तृचतज्ज्ञेयंग्रसिष्णुप्रभविष्णुच १७ ज्योति
षामपितज्ज्योतिस्तमसःपरमुच्यते ज्ञानंज्ञेयंज्ञानगम्यंहृदिसर्वस्यधि
ष्ठितं १८ इतिक्षेत्रंतथाज्ञानंज्ञेयंचोक्तंसमासतः मद्भक्तएतद्विज्ञाय
मद्भावायोपपद्यते १९ प्रकृतिंपुरुषंचैवविद्ध्यनादीउभावपि वि॰
कारांश्चगुणांश्चैवविद्धिप्रकृतिसंभवान २० कार्यकारणकर्तृ

त्वे हेतुः प्रकृतिरुच्यते पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते २१
पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान् कारणं गुणसंगोस्य सद
सद्योनिजन्मसु २२ उपद्रष्टानुमंता च भर्ता भोक्ता महेश्वरः परमात्मे
ति चाप्युक्तो देहेस्मिन्पुरुषः परः २३ य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः
सह सर्वथा वर्तमानोपि न स भूयोभिजायते २४ ध्यानेनात्मनि पश्यं
ति केचिदात्मानमात्मना अन्ये सांख्येन योगेन कर्मयोगेन चापरे
२५ अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते तेपि चातितरंत्येव
मृत्युं श्रुतिपरायणाः २६ यावत्संजायते किंचित्सत्त्वं स्थावरजंगमं
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ २७ समं सर्वेषु भूतेषु तिष्ठंतं परमे
श्वरं विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति २८ समं पश्यन्हि
सर्वत्र समवस्थितमीश्वरं न हिनस्त्यात्मनात्मानं ततो याति परां गतिं

२८ प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः यः पश्यति तथात्मा
नमकर्तारं स पश्यति २९ यदा भूतपृथग्भावमेकस्थमनुपश्यति ततः
एव च विस्तारं ब्रह्म संपद्यते तदा ३० अनादित्वान्निर्गुणत्वात्परमात्मा
यमव्ययः शरीरस्थोपि कौंतेय न करोति न लिप्यते ३१ यथा सर्वगतं
सौक्ष्म्यादाकाशं नोपलिप्यते सर्वत्रावस्थितो देहे तथात्मा नोप
लिप्यते ३२ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः क्षेत्रं क्षेत्री
तथा कृत्स्नं प्रकाशयति भारत ३३ क्षेत्र क्षेत्रज्ञयोरेवमंतरं ज्ञानच
क्षुषा भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परं ३४ १ श्री ग द्वी
सु नि सु ब्र वा यो शा श्री स्ना न वा क्षे क्षे त्र दे
यो ना त्र द ध्या १३ श्री ग नु च पा भूयः प्रवक्ष्यामि
ज्ञानानां ज्ञानमुत्तमं यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः

१ इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः सर्गेपि नोपजायंते प्रलये न
व्यथंति च २ मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहं संभवः सर्वभूता
नां ततो भवति भारत ३ सर्वयोनिषु कौंतेय मूर्तयः संभवंति याः तासां
ब्रह्म महद्योनिरहं बीजप्रदः पिता ४ सत्वं रजस्तम इति गुणाः प्रकृति
संभवाः निबध्नंति महाबाहो देहे देहिनमव्ययं ५ तत्र सत्वं निर्मल
त्वात्प्रकाशकमनामयं सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ६
रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवं तन्निबध्नाति कौंतेय कर्मसंगे
न देहिनं ७ तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनां प्रमादालस्यनि
द्राभिस्तन्निबध्नाति भारत ८ सत्वं सुखे संजयति रजः कर्मणि भारत
ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ९ रजस्तमश्चाभिभूय सत्वं
भवति भारत रजः सत्वं तमश्चैव तमः सत्वं रजस्तथा १० सर्वद्वारे

षुदेहेस्मिन्प्रकाशउपजायते ज्ञानंयदा तदाविद्याद्विवृद्धंसत्वमित्यु
त ११ लोभःप्रवृत्तिरारंभःकर्मणामशमःस्पृहा रजस्येतानिजायंते
विवृद्धेभरतर्षभ १२ अप्रकाशोप्रवृत्तिश्चप्रमादोमोहएवच तमः
स्येतानिजायंतेविवृद्धेकुरुनंदन १३ यदासत्वेप्रवृद्धेतुप्रलयंयाति
देहभृत तदोत्तमविदांलोकानमलान्प्रतिपद्यते १४ रजसिप्रल
यंगत्वाकर्मसंगिषुजायते तथाप्रलीनस्तमसिमूढयोनिषुजायते
१५ कर्मणःसुकृतस्याहुःसात्विकंनिर्मलंफलं रजसस्तुफलंदुःखम
ज्ञानंतमसःफलं १६ सत्वात्संजायतेज्ञानंरजसोलोभएवच प्रमा
दमोहौतमसोभवतोज्ञानमेवच १७ ऊर्ध्वंगच्छंतिसत्वस्थामध्येति
ष्ठंतिराजसाः जघन्यगुणवृत्तिस्थाअधोगच्छंतितामसाः १८ ना
न्यंगुणेभ्यःकर्तारंयदाद्रष्टानुपश्यति गुणेभ्यश्चपरंवेत्तिमद्भावं

सोधिगछति १९ गुणानेतानतीत्यत्रीन्देहीदेहसमुद्भवान जन्मम
त्युजरादुःखैर्विमुक्तोमृतमश्नुते २० अ उ वा कैर्लिंगैस्त्रीन्गुणा
नेतानतीतोभवतिप्रभो किमाचारःकथंचैतांस्त्रीन्गुणानेतानति
वर्तते २१ श्री भ उ वा प्रकाशंचप्रवृत्तिंचमोहमेवचपांडव
नद्वेष्टिसंप्रवृत्तानिननिवृत्तानिकांक्षति २२ उदासीनवदासीनो
गुणैर्योनविचाल्यते गुणावर्ततइत्येवयोवतिष्टतिनेंगते २३ सम
दुःखसुखःस्वस्थःसमलोष्टाश्मकांचनः तुल्यप्रियाप्रियोधीरस्तु
ल्यनिंदात्मसंस्तुतिः २४ मानापमानयोस्तुल्यस्तुल्योमित्रारिप
क्षयोः सर्वारंभपरित्यागीगुणातीतःसउच्यते २५ मांचयोव्यभि
चारेणभक्तियोगेनसेवते सगुणान्समतीत्यैतान्ब्रह्मभूयायक
ल्पते २६ ब्रह्मणोहिप्रतिष्टाहममृतस्याव्ययस्यच शाश्वतस्यच

धर्मस्य सुखस्यैकांतिकस्य च २७ १४ श्री भ गी सू नि सु ब्रह्म
द्या यो शा श्री कृ अ सं गु त्र वि भा यो ना तु शो यः
१४ श्री भ उ च ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययं छंदां-
सि यस्य पर्णानि यस्तं वेद स वेदवित् १ अधश्च मूलान्यनुसंततानि
कर्मानुबंधीनि मनुष्यलोके अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्र-
वृद्धा विषयप्रवालाः २ न रूपमस्येह तथोपलभ्यते नांतो न चादि-
र्न च संप्रतिष्ठा अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छि-
त्वा ३ ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तंति भूयः तमे-
व चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ४ निर्मानमोहा जि-
तसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः द्वंद्वैर्विमुक्ताः सुख-
दुःखसंज्ञैर्गच्छंत्यमूढाः पदमव्ययं तत् ५ न तद्भासयते सूर्यो न शशां-

शांको नपावकः यद्गत्वाननिवर्त्तंतेतद्धामपरमंमम ६ ममैवांशोजीव
लोकेजीवभूतःसनातनः मनःषष्ठानींद्रियाणिप्रकृतिस्थानिकर्षति
७ शरीरंयदवाप्नोतियच्चाप्युत्क्रामतीश्वरः गृहीत्वैतानिसंयातिवायु
र्गंधानिवाशयात ८ श्रोत्रंचक्षुःस्पर्शनंचरसनंघ्राणमेवच अधिष्ठा
यमनश्चायंविषयानुपसेवते ९ उत्क्रामंतंस्थितंवापिभुंजानंवागुणा
न्वितं विमूढानानुपश्यंतिपश्यंतिज्ञानचक्षुषः १० यतंतोयोगिनश्चै
नंपश्यंत्यात्मन्यवस्थितं यतंतोप्यकृतात्मानोनैनंपश्यंत्यचेतसः ११
यदादित्यगतंतेजोजगद्भासयतेखिलं यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धि
मामकं १२ गामाविश्यचभूतानिधारयाम्यहमोजसा पुष्णामिचौषधीः
सर्वाःसोमोभूत्वारसात्मकः १३ अहंवैश्वानरोभूत्वाप्राणिनांदेह
माश्रितः प्राणापानसमायुक्तःपचाम्यन्नंचतुर्विधं १४ सर्वस्यचा

हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनंच वेदैश्च सर्वैरहमेव वेद्यो
वेदांतकृद्वेदविदेव चाहं १५ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव
च क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते १६ उत्तमः पुरुषस्त्वन्यः
परमात्मेत्युदाहृतः यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः १७ यस्मा
त्क्षरमतीतोऽहमक्षरादपि चोत्तमः अतोऽस्मि लोके वेदे च प्रथितः पुरुषो
त्तमः १८ यो मामेवमसंमूढो जानाति पुरुषोत्तमं स सर्वविद्भजति मां स
र्वभावेन भारत १९ इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ एतद्बुद्ध्वा
बुद्धिमान्स्यात्कृतकृत्यश्च भारत २० इ श्री भ गी सू नि सु ब्र
द्या यो शा श्री कृ न र्जा पु षो म यो प च शो यः
१५ श्री भ नु च अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः दानं द
मश्च यज्ञश्च स्वाध्यायस्तप आर्जवं १ अहिंसा सत्यमक्रोधस्त्यागः

शांतिरपैशुनं दया भूतेष्वलोलत्वं मार्दवं ह्रीरचापलं २ तेजः क्षमा धृ
तिः शौचमद्रोहो नातिमानिता भवंति संपदं दैवीमभिजातस्य भारत
३ दंभो दर्पोभिमानश्च क्रोधः पारुष्यमेव च अज्ञानं चाभिजातस्य
पार्थ संपदमासुरीं ४ दैवी संपद्विमोक्षाय निबंधायासुरी मता मा शु
चः संपदं दैवीमभिजातोसि पांडव ५ द्वौ भूतसर्गौ लोकेस्मिन्दैव आसु
र एव च दैवो विस्तरशः प्रोक्तः आसुरं पार्थ मे शृणु ६ प्रवृत्तिं च नि
वृत्तिं च जना न विदुरासुराः न शौचं नापि चाचारो न सत्यं तेषु विद्यते
७ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं अपरस्परसंभूतं किमन्य
त्कामहैतुकं ८ एतां दृष्टिमवष्टभ्य नष्टात्मानोल्पबुद्धयः प्रभवं
त्युग्रकर्माणः क्षयाय जगतोहिताः ९ काममाश्रित्य दुष्पूरं दंभमा
नमदान्विताः मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तंतेशुचिव्रताः १० नि

तामपरिमेयांचप्रलयांतामुपाश्रिताः कामोपभोगपरमाएतावदिति
निश्चिताः ११ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ईहंतेका
मभोगार्थमन्यायेनार्थसंचयान् १२ इदमद्यमयालब्धमिमंप्राप्स्येम
नोरथं इदमस्तीदमपिमेभविष्यतिपुनर्धनं १३ असौमयाहतःशत्रु
र्हनिष्येचापरानपि ईश्वरोहमहंभोगीसिद्धोहंबलवान्सुखी १४
आढ्योभिजनवानस्मिकोन्योस्तिसदृशोमया यक्ष्येदास्यामिमोदि
ष्यइत्यज्ञानविमोहिताः १५ अनेकचित्तविभ्रांतामोहजालसमावृ
ताः प्रसक्ताःकामभोगेषुपतंतिनरकेशुचौ १६ आत्मसंभाविताः
स्तब्धाधनमानमदान्विताः यजंतेनामयज्ञैस्तेदंभेनाविधिपूर्वकं
१७ अहंकारंबलंदर्पंकामंक्रोधंचसंश्रिताः मामात्मपरदेहेषुप्रद्वि
षंतोभ्यसूयकाः १८ तानहंद्विषतःक्रूरान्संसारेषुनराधमान् क्षिपा

मजस्रमशुभानासुरीष्वेवयोनिषु १९ आसुरींयोनिमापन्नामूढाजन्म
निजन्मनि मामप्राप्यैवकौंतेयततोयांत्यधमांगतिं २० त्रिविधंन
रकस्येदंद्वारंनाशनमात्मनः कामःक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्य
जेत् २१ एतैर्विमुक्तःकौंतेयतमोद्वारैस्त्रिभिर्नरः आचरत्यात्मनः
श्रेयस्ततोयातिपरांगतिं २२ यःशास्त्रविधिमुत्सृज्यवर्ततेकामका
रतः नससिद्धिमवाप्नोतिनसुखंनपरांगतिं २३ तस्माच्छास्त्रंप्रमा
णंतेकार्याकार्यव्यवस्थितौ ज्ञात्वाशास्त्रविधानोक्तंकर्मकर्तु
मिहार्हसि २४ इ श्री ग ही सु नि सु ह्म द्या यो
शा श्री स्मा न वा दै सु सं वि गो म ३ ध्या
१६ अ र्ज न वा येशास्त्रविधिमुत्सृज्ययजंतेश्रद्धयान्विताः ते
षांनिष्ठातुकाकृष्णसत्वमाहोरजस्तमः १ श्री भ उ त्रि

विधा भवति श्रद्धा देहिनां सा स्वभावजा सात्विकी राजसी चैव
तामसी चेति तां शृणु २ सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत
श्रद्धामयोयं पुरुषो यो यच्छ्रद्धः स एव सः ३ यजंते सात्विका देवा॰
यक्षरक्षांसि राजसाः प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः
४ अशास्त्रविहितं घोरं तप्यंते ये तपो जनाः दंभाहंकारसंयुक्ताः
कामरागबलान्विताः ५ कर्षयंतः शरीरस्थं भूतग्राममचेतसः
मां चैवांतःशरीरस्थं तान्विद्ध्यासुरनिश्चयान ६ आहारस्त्वपि स
र्वस्य त्रिविधो भवति प्रिय यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृ
णु ७ आयुःसत्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः स्निग्धाः
स्थिरा हृद्या आहाराः सात्विकप्रियाः ८ कट्वम्ललवणात्युष्णती॰
क्ष्णरूक्षविदाहिन आहारा राजसस्येष्टा दुःखशोकामयप्रदाः

९ यातयामं गतरसं पूति पर्युषितं च यत् उच्छिष्टमपि चामेध्यं भोजनं
तामसप्रियं १० अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते यष्टव्य
मेवेति मनः समाधाय स सात्त्विकः ११ अभिसंधाय तु फलं दंभार्थ
मपि चैव यत् इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं १२ विधिहीन
मसृष्टान्नं मंत्रहीनमदक्षिणं श्रद्धाविरहितं यज्ञं तामसं परिचक्षते
१३ देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं ब्रह्मचर्यमहिंसा च शारीरं
तप उच्यते १४ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् स्वाध्या
याभ्यसनं चैव वाङ्मयं तप उच्यते १५ मनःप्रसादः सौम्यत्वं मौनमा
त्मविनिग्रहः भावसंशुद्धिरित्येतत्तपो मानसमुच्यते १६ श्रद्धया प
रया तप्तं तपस्तत्त्रिविधं नरैः अफलाकांक्षिभिर्युक्तैः सात्त्विकं परि
चक्षते १७ सत्कारमानपूजार्थं तपो दंभेन चैव यत् क्रियते तदि

ह प्रोक्तं राजसंचलमध्रुवं १८ मूढग्राहेणात्मनो यत्पीडया क्रियः
ते तपः परस्योत्सादनार्थं वा तत्तामसमुदाहृतं १९ दातव्यमिति य
द्दानं दीयतेनुपकारिणे देशे कालेच पात्रेच तद्दानं सात्विकं स्मृ
तं २० यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः दीयतेच परिक्लि
ष्टं तद्दानं राजसमुदाहृतं २१ अदेशकालेयद्दानमपात्रेभ्यश्च दीयते
असत्कृतमवज्ञातं तत्तामसमुदाहृतं २२ ॐतत्सदिति निर्देशो ब्रह्म
णस्त्रिविधः स्मृतः ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा
२३ तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः प्रवर्त्तंते विधानोक्ताः
सततं ब्रह्मवादिनां २४ तदित्यनभिसंधाय फलं यज्ञतपः क्रियाः
दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः २५ सद्भावे साधुभा
वे च सदित्येतत्प्रयुज्यते प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्य

ते २६ यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते कर्म चैव तदर्थीयं सदि
त्येवाभिधीयते २७ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत असदित्यु
च्यते पार्थ न च तत्प्रेत्य नो इह २८ ॥ श्री ग ह्री सु नि सु द्र
द्या यो शा श्री ह्मा न वा त्रि ग भा यो ना स द श्या
१७ अ्र्ध न वा संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुं त्याग
स्य च हृषीकेश पृथक्केशिनिसूदन १ श्री ग नु च काम्यानां का
र्मणां न्यासं संन्यासं कवयो विदुः सर्वकर्मफलत्यागं प्राहुस्त्यागं विच
क्षणाः २ त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः यज्ञदानतपः
कर्म न त्याज्यमिति चापरे ३ निश्चयं शृणु मे तत्र त्यागे भरतसत्तमः
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ४ यज्ञो दानतपःकर्म
न त्याज्यं कार्यमेव तत् यज्ञो दानं तपश्चैव पावनानि मनीषिणां ५

एतान्यपितुकर्माणिसंगंत्यक्त्वाफलानिच कर्तव्यानीतिमेपार्थनिश्चि
तंमतमुत्तमं ६ नियतस्यतुसंन्यासःकर्मणोनोपपद्यते मोहात्तस्यप॰
रित्यागस्तामसःपरिकीर्तितः ७ दुःखमित्येवयत्कर्मकायक्लेशभयात्त्य
जेत सकृत्वाराजसंत्यागंनैवत्यागफलंलभेत ८ कार्यमित्येवयत्कर्म
नियतंक्रियतेर्जुन संगंत्यक्त्वाफलंचैवसत्यागःसात्विकोमतः ९ न
द्वेष्ट्यकुशलंकर्मकुशलेनानुषज्जते त्यागीसत्वसमाविष्टोमेधावीछिन्न
संशयः १० नहिदेहभृताशक्यंत्यक्तुंकर्माण्यशेषतः यस्तुकर्मफलत्या
गीसत्यागीत्यभिधीयते ११ अनिष्टमिष्टंमिश्रंचत्रिविधंकर्मणःफ॰
लं भवत्यत्यागिनांप्रेत्यनतुसंन्यासिनांक्वचित १२ पंचैतानिमहाबा
होकारणानिनिबोधमे सांख्येकृतांतेप्रोक्तानिसिद्धयेसर्वकर्मणां १३
अधिष्ठानंतथाकर्ताकरणंचपृथग्विधं विविधाश्चपृथक्चेष्टादैवं

दैवंचात्रपंचमं १४ शरीरवाङ्मनोभिर्यत्कर्मप्रारभतेनरः न्याय्यंवा।
विपरीतंवापंचैतेतस्यहेतवः १५ तत्रैवंसतिकर्तारमात्मानंकेवलं
तुयः पश्यत्यकृतबुद्धित्वान्नसपश्यतिदुर्मतिः १६ यस्यनाहंकृतोभा
वोबुद्धिर्यस्यनलिप्यते हत्वापिसइमांल्लोकान्नहंतिननिबध्यते १७
ज्ञानंज्ञेयंपरिज्ञातात्रिविधाकर्मचोदना करणंकर्मकर्तेतित्रिविधःकर्म
संग्रहः १८ ज्ञानंकर्मचकर्ताचत्रिविधैवगुणभेदतः प्रोच्यतेगुणसंख्या
नेयथावच्छृणुतान्यपि १९ सर्वभूतेषुयेनैकंभावमव्ययमीक्षते अवि
भक्तंविभक्तेषुतज्ज्ञानंविद्धिसात्विकं २० पृथक्त्वेनतुयज्ज्ञानंनानाभावा
न्पृथग्विधान वेत्तिसर्वेषुभूतेषुतज्ज्ञानंविद्धिराजसं २१ यत्तुकृत्स्नवदे
कस्मिन्कार्येशक्तमहेतुकं अतत्वार्थवदल्पंचततामसमुदाहृतं २२ नि
यतंसंगरहितमरागद्वेषतःकृतं अफलप्रेप्सुनाकर्मयत्तत्सात्विकमुच्य

ते २३ यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः क्रियते बहुलायासं तद्राज॰
समुदाहृतं २४ अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषं मोहादारभ्यते कर्म॰
यत्तत्तामसमुदाहृतं २५ मुक्तसंगोनहंवादी धृत्युत्साहसमन्वितः सिद्ध्य
सिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते २६ रागी कर्मफलप्रेप्सुर्लुब्धो हिं
सात्मको शुचिः हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः २७ अयुक्तः॰
प्राकृतः स्तब्धः शठो नैष्कृतिकोलसः विषादी दीर्घसूत्री च कर्ता तामस उ
च्यते २८ बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु प्रोच्यमानमशेषेण पृ
थक्त्वेन धनंजय २९ प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बंधं मो
क्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ३० यया धर्ममधर्मं च कार्यं चाका
र्यमेव च अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ३१ अधर्मं धर्म॰
मिति या मन्यते तमसावृता सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी

३२ धृत्याययाधारयतेमनःप्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्याधृतिः
सापार्थसात्विकी ३३ ययातुधर्मकामार्थान्धृत्याधारयतेर्जुन प्रसंगे
नफलाकांक्षीधृतिःसापार्थराजसी ३४ ययास्वप्नंभयंशोकंविषादंम
दमेवच नविमुंचतिदुर्मेधाधृतिःसापार्थतामसी ३५ सुखंत्विदानीं
त्रिविधंशृणुमेभरतर्षभ अभ्यासाद्रमतेयत्रदुःखांतंचनिगच्छति ३६
यत्तदग्रेविषमिवपरिणामेमृतोपमं तत्सुखंसात्विकंप्रोक्तमात्मबुद्धि
प्रसादजं ३७ विषयेंद्रियसंयोगाद्यत्तदग्रेमृतोपमं परिणामेविषमि
वतत्सुखंराजसंस्मृतं ३८ यदग्रेचानुबंधेचसुखंमोहनमात्मनः निद्रा
लस्यप्रमादोत्थंतत्तामसमुदाहृतं ३९ नतदस्तिपृथिव्यांवादिविदेवे
षुवापुनः सत्वंप्रकृतिजैर्मुक्तंयदेभिःस्यात्त्रिभिर्गुणैः ४० ब्राह्मणक्षत्रि
यविशांशूद्राणांचपरंतप कर्माणिप्रविभक्तानिस्वभावप्रभवैर्गु

णैः ४१ शमोदमस्तपःशौचंक्षांतिरार्जवमेवच ज्ञानंविज्ञानमास्ति
क्यंब्रह्मकर्मस्वभावजं ४२ शौर्यंतेजोधृतिर्दाक्ष्यंयुद्धेचाप्यपलायनं
दानमीश्वरभावश्चक्षात्रंकर्मस्वभावजं ४३ कृषिगोरक्ष्यवाणिज्यं
वैश्यकर्मस्वभावजं परिचर्यात्मकंकर्मशूद्रस्यापिस्वभावजं ४४
स्वेस्वेकर्मण्यभिरतःसंसिद्धिंलभतेनरः स्वकर्मनिरतःसिद्धिंयथाविंद
तितच्छृणु ४५ यतःप्रवृत्तिर्भूतानांयेनसर्वमिदंततं स्वकर्मणातमभ्य
र्च्यसिद्धिंविंदतिमानवः ४६ श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठि
तात् स्वभावनियतंकर्मकुर्वन्नाप्नोतिकिल्बिषं ४७ सहजंकर्मकौंतेय
सदोषमपिनत्यजेत् सर्वारंभाहिदोषेणधूमेनाग्निरिवावृताः ४८ अस
क्तबुद्धिःसर्वत्रजितात्माविगतस्पृहः नैष्कर्म्यसिद्धिंपरमांसंन्यासेनाधिग
च्छति ४९ सिद्धिंप्राप्तोयथाब्रह्मतथाप्नोतिनिबोधमे समासेनैवकौंते

पनिष्ठा ज्ञानस्य या परा ५० बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ५१ विविक्तसेवी लघ्वा
शी यतवाक्कायमानसः ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ५२
अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं विमुच्य निर्ममः शान्तो ब्रह्मभूया
य कल्पते ५३ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति समः सर्वेषु
भूतेषु मद्भक्तिं लभते परां ५४ भक्त्या मामभिजानाति यावान्यश्चा
स्मि तत्त्वतः ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरं ५५ सर्वकर्मा
ण्यपि सदा कुर्वाणो मद्व्यपाश्रयः मत्प्रसादादवाप्नोति शाश्वतं पद
मव्ययं ५६ चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः बुद्धियोगमुपाश्रि
त्य मच्चित्तः सततं भव ५७ मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि
अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ५८ यदहंकारमाश्रित्य

न योत्स्य इति मन्यसे मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ५
९ स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा कर्तुं नेच्छसि यन्मोहात्क
रिष्यस्यवशोपि तत् ६० ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठति भ्रामये
न् सर्वभूतानि यंत्रारूढानि मायया ६१ तमेव शरणं गच्छ सर्वभा
वेन भारत तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतं ६२ इति
ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया विमृश्यैतदशेषेण यथेच्छसि तथा
कुरु ६३ सर्वगुह्यतमं भूयः शृणु मे परमं वचः इष्टोसि मे दृढमिति तत
तो वक्ष्यामि ते हितं ६४ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोसि मे ६५ सर्वधर्मान्परित्यज्य मामे
कं शरणं व्रज अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ६६ इदं
ते नातपस्काय नाभक्ताय कदाचन न चाशुश्रूषवे वाच्यं न च मां

योभ्यसूयति ६७ य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति भक्तिं
मयि परां कृत्वा मामेवैष्यत्यसंशयः ६८ न च तस्मान्मनुष्येषु
कश्चिन्मे प्रियकृत्तमः भविता न च मे तस्मादन्यः प्रियतरो भुवि
६९ अध्येष्यते च य इमं धर्म्यं संवादमावयोः ज्ञानयज्ञेन तेनाह
मिष्टः स्यामिति मे मति ७० श्रद्धावाननसूयश्च शृणुयादपि
यो नरः सोपि मुक्तः शुभांल्लोकान्प्राप्नुयात्पुण्यकर्मणां ७१
कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा कच्चिदज्ञानसंमो
हः प्रनष्टस्ते धनंजय ७२ अ उ वा नष्टो मोहः स्मृतिर्ल
ब्धा त्वत्प्रसादान्मयाच्युत स्थितोस्मि गतसंदेहः करिष्ये वच
नं तव ७३ सं य वा इत्यहं वासुदेवस्य पार्थस्य च महात्म
नः संवादमिममश्रौषमद्भुतं रोमहर्षणं ७४ व्यासप्रसादा

श्रुतवानेतद्गुह्यमहंपरं योगंयोगेश्वरात्कृष्णात्साक्षात्क
थयतःस्वयं ७५ राजन्संस्मृत्यसंस्मृत्यसंवादमिममद्भुतं
केशवार्जुनयोःपुण्यंहृष्यामिचमुहुर्मुहुः ७६ तच्चसंस्मृत्य
संस्मृत्यरूपमत्यद्भुतंहरेः विस्मयोमेमहान्राजन्हृष्यामि
चपुनःपुनः ७७ यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्धरः त
त्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम ७८ १ श्री हा
र श्र सा स्तुं हि पां प व ता प ष बु वि
पां रा हे कृ डे मे दे हे न्मा यो ना षा
श्री पः १८ इतिश्रीभागवतद्गीतासंपूर्णं समाप्तं शुभमसंवत
१८२२ पुण्यसितिथु भद्रपदयां ३ केउकक्षेपद्धे लिख्यते
विराजमानसकलगुणनिधानंवृक्षचैत्यमवो विधानंश्री

गी०
श्री
कुलालदासवैस्यवालिख्यतं ।। ग्रावसश्रीरामुस्थान
गोपाल
वाज्ञत्रस्य
पूर्णी स्यातं
दासवैस्य
श्रीरामायनमः ।। श्रीराधाकृस्नायनमः ।। श्रीगोपालाय
गी०
श्री
श्री
ता०
श्री
ता०